त्वनिवेशयतेन न हानातिव्याप्तिः गुणान्यत्वविशिष्टसत्तात्वावच्छिन्नाधेयतानिरूपकत्वसामान्याभावस्य गुणेऽपि स
त्वात् अधिकरणतानिरूपकतावच्छेदकस्य वाधेयतावच्छेदकत्वादित्यवधेयम् साध्यासामा[illegible]नारण्य प ध्वि
दं साध्याधिकरणवृत्तित्वाभाववत्प्रयययघान्युतार्थकमेव सामानाधिकरण्यपस्याव्याप्यवृत्तित्वाभ्युपग
दी मेन द्रव्यं सत्वादित्यादावतिव्याप्तेरभावात् नैवं धूमादावव्याप्तिर्धूमावयवावच्छेदेन वह्निमद्वृत्तित्वाभावस्य
धूमादौ सत्वादिति वाच्यम् हेतुतावच्छेदकसंबंधेन यद्धेत्वधिकरणं तदवच्छिन्नत्वेन साध्यवद्वृत्तित्वाभावस्य विशे
षणीयत्वात् साध्यवैयधिकरण्यपदं च साध्यानधिकरणवृत्तित्वपरमतो न स्वरापोयानाभेइति सार्वभौ
मभौममतमाह होयितो केचित्तिति शश्माधिकरणायर्वनाहिनिष्टस्य वह्निमद्वृत्तित्वाभावस्य धूमे सत्वादव्याप्ति
मा शंक्याह सप्तमीच्छवच्छेदकतायामिति तादृशावच्छेदकताया अनिरूपकतया साध्यवद्वृत्तित्वाभावे अन्व
यः आघयत्वेति हेतुतावच्छेदकसंबंधेन हेत्वधिकरणा इति भागस्य सर्थः अनुषज्यतरतिलक्षणे साध्यवत्व

भवा·टी

९६

96

स्य साध्यतावच्छेदकसंबंधेन विवक्षितत्वादिति शेषः तत्प्रयोजनं च· तादृशाविवक्षणप्रयोजनं च· दीधितौ ध
मस्यावयवेसंयोगेनेति· एतन्मते सामानाधिकरण्यस्य अव्याप्यवृत्तित्वादिति भावः तत्रैव समवायेनाव
त्तावपीति· यद्यपि संबंधसामान्येन साध्यवद्वृत्तित्वस्याभावनिवेशने यदायतथापि धूमाधिकरणे पर्वतादौ
येन केनचित्संबंधेन वृत्तौ संबंधसामान्येन वह्निमद्वृत्तित्वस्याभावो न संभवति· संबंधसामान्येन धूमाधि
करणवृत्तौ च संबंधसामान्येन वह्निमद्वृत्तित्वस्याभावसंभवेऽपि तत्र न धूमाधिकरणस्यावच्छेदकत्वं
तस्यावच्छेद्याधिकरणासंबद्धत्वादिति संबंधसामान्येन तादृशसाध्याभाववद्वृत्तित्वाभावस्याप्रसिध्यात्त
स्वरूपवेशासंभवाद्य किंचित्संबंधेन साध्यवद्वृत्तित्वस्याभावो निवे[illegible]नीयस्तथा सत्यपि हेतावरतिभा
वः विवक्षणमेव· विरोधभंजकावच्छेदकत्वादिलक्षणमेव। इति प्रतीतित्वादिति· नचैतादृशप्रतीसा
रूपादौ पर्वतवृत्तित्वमव विषयी क्रियते न तु पर्वते रूपनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वमिति वा
वाच्यम् तथा सति पर्वते धूमेन वह्निमत्संयुक्तत्वमिति प्रतीत्यापत्तेः पर्वतवृत्तिधूमस्यावयवावच्छेदेनव राम

६८

न्हिमत्संयुक्तत्वाभावसत्वात् नचहेत्वधिकरणानवच्छिन्नत्वनिरूकत्वावच्छिन्नत्वनिरूकत्वाभावाभावएवहेत्वधिक
करणावच्छिन्नत्वे तच्च पर्वतीयरूपावच्छेदेतिव्याप्यवृत्त्यावच्छेदकस्वीकारेणनिरर्थकमितिवाच्यम् तादृशाभ
याभावस्यगगनादावपिसत्वेनहीधिकृतः संबंधान्तरेणावच्छिन्नमानपर्यन्तानुधावनस्यनिर्बीजत्वापत्तावरमहूष
गोभावत्वेनसाध्यवद्भिन्नत्वस्याविरहेहेतोः ग्रासिद्धेरितिहेत्वधितिग्रथा विरोधेनचतत्स्पर्दीधित्यनभिमतत्वा
त्तदीधितेोनक्षतिरिति। नाव्याप्तिर्नासंभवश्चेत्यर्थः नचकथंनाव्याप्तिः रूपादिनिष्ठस्यद्रव्यत्वमाधिकरणाव
र्वनाद्यनवच्छिन्नस्यवह्निमत्संयुक्तत्वाभावस्यसावयवावच्छेदेनपर्वतेपिसत्वादधिकरणभेदेनाभावभेदा
नुपगमादितिवाच्यम् हेतु । तावच्छेदकसंबंधेनहेत्वधिकरणावच्छिन्नत्वविशिष्टसाध्यवद्भिन्नत्वाभावाधिक
रणतायाराबलंबनाभेवेशात् पर्वतेनवह्निमत्संयुक्तत्वमितिप्रतीत्यनुरोधेनपर्वतावच्छिन्नत्वविशिष्टव
ह्निमत्संयुक्तत्वाभावाधिकरणतायाधर्मेण अनभ्युपगमात् उक्तप्रकारेणावशिष्टातिरिक्तत्वानुधावनस्यासा ति
धारणाप्रयोजनकत्वेनोपपादनसंभवेन्तरसाधारणाप्रयोजनकत्वांगीकरणमनु[redacted]

भवारी
२०
९७

जनतिकत्वोपपादनस्य सैकज्ञानसाधारणस्य पृथक्त्वेनानुगमकत्वेनाविभाववितंमित्यस्वरसः कस्याप्येतेनस्व

वितः ननु विशिष्टस्यातिरिक्तत्वे विशिष्टसत्तानिष्ठत्वयपि सत्ताभाववुद्धिप्रसंगः सत्ताभाववुद्धौ सत्तानि

ष्ठत्वयस्यैवप्रतिबंधकत्वात् इतिरिक्तप्रतिबंधकताकल्पने गौरवं तत्र पृथक्त्वयापि सत्ताभाववुद्धौ सत्तानिष्ठप्रव

नेवप्रतिबंधकतागव्यानिष्ठयत्वव्ययदि सत्ताभावाप्रकारकत्वे सति सत्ताप्रकारकत्वं तदा विशिष्टस

त्ताभाववान्सत्तावान्वेति वुद्धेरसंग्रहप्रसंगः यदि च शुद्धसत्ताभावाप्रकारकत्वगर्भं तदा विशिष्टसत्ता

१ सहस्यापि संग्रहप्रसंग इति शुद्धसत्ताभावाप्रकारकत्वे सति शुद्धसत्ताप्रकारकत्वं तद्व्याप्यत्वेनैव विशिष्ट

य सत्तानिष्ठस्यासंग्रहादिति भिन्नप्रतिबंधकताकल्पनं तदवश्यं स्वरूपकमिति चेन्न तथापि विशिष्टस्याति

तिरिक्तत्वे मानाभावः न च विशिष्टस्यानतिरिक्तत्वे गुणसाकर्मान्यत्व विशिष्टसत्ता नास्तीति वुद्धिर्न स्या रे

त्सत्तायास्तत्र सत्वादिति विशिष्टस्यातिरिक्तत्वमावश्यकमिति वाच्यं सत्तावत्त्वापि वैशिष्ट्यावच्छिन्नस

त्तानिरूपितस्य गुणादिष्वाभावत्तस्यातिरिक्तसंबंधस्यैव कल्पनात् न च विनिगमनाविरहः विशिष्टमेवाति राम

रिक्तमिति तस्यापि सत्त्वात्त्वादिति वाच्यं धर्मिकल्पनातः श्रुतन्यायात् किंचाविशिष्टस्यातिरिक्तत्वेन तत्रं देना विशि
शिष्टयोर्भेदघटकाभिन्नायाः अप्रामाणिकप्रसंगेन स्थैर्यमात्रोच्छेदप्रसंगः पूर्वापरक्षणावच्छिन्नविशिष्ट
योर्भेदे वस्तुमात्रस्य क्षणिकत्वापत्तेः इत्यतः आह दीधितावन्नतिरेके त्विति । द्वितीयलक्षणे तन्नैव लड़ ति
दे भमपीतिमत्त्वेनोभयत्वेन रूपेण तत्तद्रूपेण द्वयस्यैवोपस्थितत्वे यानि ञापि तदेभयत्वेनैव परामर्शात् केवलान्व
यिनि द्वैतवृत्त्यायोगमव्याप्तिमातिप्रसंगेनैव लक्षणतात्पर्यात् नचप्रथमलक्षणस्य साध्यसामान्याभावघटि
तत्वे च प्रमेयत्वव्याप्तिविरहेण असंगतिर्द्वैगौरवेति वाच्यं । यत्किंचित्साध्यसामानाधिकरण्याभावनिवेशा
भिप्रायेणैव तत्राव्याप्तिसंभवात् । नहि सर्वपक्षस्थ तत्र लक्षणयोरव्याप्तिर्मूलाभिप्रेता तथा सति साध्य
तावच्छेदकावच्छिन्नसाध्यवद्भेदनिवेशस्य द्वितीयलक्षणस्यतत्राव्याप्त्यभावेन यत्किंचित्साध्यवद्भेदनिवेश
प्रसेर्योरलक्षणद्वयाव्याप्तिप्रतिपादकमूलासंगतिरिति वाच्यम् । नहि लक्षणद्वयस्य परामर्शेऽपि तयोः
केवलान्वयिनि [redacted] प्रतियादकस्य यत्किंचित्साध्यानधिकरणाधिकरणीयत्वमेरतिमत्तस्यासं

सामानाधिकरण्य

भ॰वा॰टी॰
९८
98

गपेन॥ चयात्किंचित्साध्यानधिकरणाँश्रुतिर्हि हेनोर्हितीपलक्षणायामेवोपपादकत्वयाततत्रप्रथमलक्ष धिकरणे
णाव्यासिर्नन्मलाभिप्रेनेति वाच्यम् नियात्किंचित्साध्यानधिकरणा धिकरणात्त्वस्यस्यय त्किंचित्साध्याधि
करणावृत्तावित्यस्योपलक्षणत्वादिरसभिप्रायात्। वस्तुतस्तु॰ इदंवाच्यंप्रमेयादित्यत्र संबंधसामान्ये
नेह्नुतायाकेवलान्वयिविशेषसाध्यसामानाधिकरण्याभावाप्रसिध्या॰ व्याप्तिः प्रथमलक्षणोपीति
ध्येयं॰ सामानाधिकरण्यनिरूपितस्वस्वरूपसंबंधरूपावच्छेदकत्वस्याप्रसिद्धेरवच्छेदकत्वसंबंधेनसामा
धिकरणाभावविषयकत्वेतुनाहशाभावस्यकेवलान्वयितयाद्वयोमत्तायांनद्रव्यत्वसामानाधिकरण
मित्यस्याप्यायत्तिरतआह स्वनिरूपकेति॰ ननुद्रव्यत्वेगुणेनपृथिवीत्वसामानाध्यकरणमिति
प्रतीतेर्द्रव्यत्वेगुणावच्छेदेनपृथिवीत्वसामानाधिकरण्याभावोनविषयः गुणस्यावच्छेद्याधिकरणत्वय
त्वासंबद्धत्वेनानवच्छेदकत्वात्मकृतप्रतीतेस्तुसत्तायांगुणावच्छेदेनद्रव्यत्वसामानाधिकरण्याभावविष
यत्वेनतद्बोधकमतत्वेनवाधिकाप्रतीते[redacted]माह॰ द्विधि[redacted]नोसत्तानद्रव्यत्वंतित्वा
राम
९८

भववतीति यद्यपि सत्तायां द्रव्यत्वसामानाधिकरण्येन तत्सामानाधिकरण्यप्रतीतिरेव बाधकत्वेन वक्तुं
युक्ता न त्वापि सामानाधिकरण्यस्याव्याप्यवृत्तित्वात् तत्प्रतीतेर्न बाधकत्वं संभवतीति नात आह इत्यत्र द्रव्यव
त्तित्वाभावाभावस्यातिरिक्तत्वे व्याप्यवृत्तित्वं चाभ्युपेयं सत्तायां तत्प्रकारकप्रतीतेरन्योन्याभावस्य व्याप्य
वृत्तित्वं न त्वाद्रव्यवृत्तित्वाभाववत्त्वप्रतीतेर्बाधकत्वं सत्ता न द्रव्यवृत्तित्वाभाववतीत्यादि फक्किकयादी
धितिकृता प्रदर्शितं तत्राशंकते । नन्विति । द्रव्यवृत्तित्वमिति अतिरिक्तत्वे मानाभावादिति भावः
असिद्धेवेति । अव्याप्यवृत्तित्वमसिद्धत्वेनोपयस्य । सत्ता न द्रव्यवृत्तित्वाभाववतीत्यत्र तादृशान्यो
न्याभाववत्तावगाहिप्रतीत्यारसमानाकारत्वान्नबाधकत्वमित्यपि बोध्यं । यद्यप्यन्योन्याभावस्याव्याप्य
वृत्तित्वमतमाश्रित्य तत्प्रतीतेरबाधकत्वशंकानेव वक्तुं न त्वापि भेदस्याव्याप्यवृत्तित्वं द्रव्यं सत्त्वादि
त्यादौ साध्यसामानाधिकरण्याभावाधिकरणाभिन्नत्वस्य सत्तायां सत्त्वेनातिव्याप्तिः स्यादि
ति । तन्मते न यादित्यत्रासिद्धत्वस्योपयुक्तं अवच्छेदकभेदमादायैवेति स्वावच्छिन्नवृत्तिकत्वरूपणाव्याप्य न

भवा०टी
६६ श्री
११

वृत्तित्वज्ञानदशायामेवेत्यर्थः बाधबुद्धेः प्रतिबंधकतायामव्याप्यवृत्तिज्ञानस्योत्तेजकत्वादिति
भावः अवच्छेदकाप्रतीतावपीति० न चाव्याप्यवृत्तित्वज्ञानशून्यकालीनायाः द्रव्यवृत्तित्वाभावो
न सत्तावृत्तिरिति प्रतीतेः प्रतिबंधकतयात उत्तरकालीनायाः सत्तायां गुणादृत्या हि प्रतीतेः स
त्तायां द्रव्यत्वसामानाधिकरण्याभावावगाहित्वं न युज्यते परंतु गुणेतन्नरवच्छेदकत्वाभावावगा
हित्वमेव एवं चाव्याप्यवृत्तित्वज्ञान[illegible]कालीनद्रव्यवृत्तित्वाभाववान् सत्तावृत्तिरिति प्रतीत्युत्तर
कालीनायाः सत्तायां गुणादृत्या हि प्रतीतेरपि तन्नरवच्छेदकत्वाभावावगाहित्वमेव समानाकार
प्रतीत्योः समानविषयकत्वनियमादिति भावः एतेन संयोगतदभाववयोरेकत्र प्रतीतेरवच्छेद
कविषयित्वापत्त्या परिहृतः संयोगवान् वृक्षः संयोगाभाववानित्याकारिकायाः नैयायिकै
रुपगमादवच्छेदकभेदमादायैवेति कथमुक्तमित्याशंकापरास्ता तत्तु तत्रैकत्र प्रतीतेरित्यस्य
युगपदित्यादिः अवच्छेदकभेदमा[illegible]दायैवेत्यस्यावच्छेदकविशेष

राम
६६

विषयीकृतत्वेनेत्यर्थः तथा च सत्तायां गुणे न द्रव्यत्वसामानाधिकरण्यमिति धीस्तु तत्र कालेऽपि द्रव्यत्वादिरूपाव
च्छेदकविषयिताया अनुवृत्तिद्रव्यवृत्तित्वाभावेन सत्तावृत्तिरिति धीतेरुक्तत्वाद्द्रव्यानुभवविकल्पनयानन्तयोर्भावाभा
वविषयकत्वपरं तु एवं सति निर्गुणत्वादेः सामानाधिकरण्यावच्छेदकत्वाभावविषयकत्वमेवेत्याशयः एवं सति सास
मानाद्द्रव्यवृत्तित्वाभाववत्त्वमिति धीनिवर्तकत्वसंभवेप्यसमाकारत्वादेव न तत्सादित्याशयः एतदनुसारेणैव भावाभा
वयोरेकत्रैकस्यमिति ध्येयं विवाहग्रन्थे स्पष्टमिति। अन्यथा नत्वस्य घनुत्वस्य संयोगवद्वृत्तित्वाभावान्न संयोगा
भाववद्वृत्तिरिति बाधकप्रत्ययस्य सत्वेन संयोगाभावसंयोगसामानाधिकरण्याभावस्य च सिद्ध्यापत्त्या तत्र
कर्माद्यवच्छेदेन सामानाधिकरण्याभावप्रतियोगिकस्य कर्मणि संयोगाभावः प्रतियोगिसमानाधिकर
णस्तिमत्वस्याप्रसंगत्वापत्तेरिति भावः दीधितिः तत्रापस्यसाद्यासंभवेनासिद्धेरिति। न चानीं द्वियेहेतोसाध्यवद्वृ
त्तित्वाभावस्यवतदधिकरणाभिन्नत्वस्य वा विषयसाद्यासंभवेनासिद्ध्या कथमनित्यत्वाभावमिति निर्णय इति वाच्यम्
तदनिर्णयेपि तत्संदेहादुक्तरीत्या तद्द्व्यसाध्यकसद्धेतावव्याप्तेर्वारणाय पानदीधितौ चकारात् स्वरगोहेतावा

मवारी ·
१००
१००

नुमानेतप्रयाणेनीरियत्वं विवक्षितमित्यभिप्रायेणाह अन्यतरस्येत्यादि पक्षतायामिति ।। रूपवानाकाशाभावादिह
गुरुरूपादित्याद्यावित्यर्थः कद्वावित्ति । अत्यन्ताभावप्रसक्तेर्याव्यप्रतियोगिकत्वमात्रस्य तंत्रत्वपक्षे आकाशाभा
वरूपवद्वृत्तित्वाभावस्य गुरुत्ववद्वृत्तित्वरूपवत्तित्वाभावस्य च प्रसक्तेः संभवादित्यर्थः यद्यपि साध्यवद्वृत्ति ह
त्वे हेतुवृत्तित्वाभावो भेदलक्षणघटकस्तथापि गुरुत्ववद्वृत्तित्वे रूपवद्वृत्तित्वाभावप्रत्यक्षोत्तरं तन्मते कथमा
पानेरणं रूपे गुरुत्ववद्वृत्तित्वाभावो विशकयहरत्याशयः । अव्याप्यवृत्तित्वाभावं इति । तद्व्याप्यवृत्तित्वा
भ्युपगमेपतुत्वं सत्त्वादित्याद्येऽव्याप्यत्वसामानाधिकरण्याभावैक्षिकरणा भिन्नत्वस्य सत्त्वाद्यांसत्वेनानितव्याप्त्या
पत्तेरिति भावः अप्रयोजकत्वादिति नन्ववच्छेदकतासंबंधेन संयोगस्यावच्छिन्नप्रतिनातात्म्यनतानद्रव्यपवान्नाहे
तुत्वस्यानुकूलतर्कस्याभावात्कथमप्रयोजकत्वं नवतत्रमानाभावः एकावच्छेदेनैस्यसंयोगस्य द्रव्यपवान्ने नायमानर
यावच्छेदेनोत्यत्यापत्तेरतः किंचेति तुल्यत्वादिति स्वस्वपत्लस्यत्वं एवसानैत्रानीत्यपत्रनीयसाध्यानाव
च्छेदकेवहेतौ साध्याभाववद्वृत्तित्वव्यापकत्वघटितलक्षणात्थोरवाप्तिरित्ययविवेध्यम अनवच्छिन्नत्वा रा म

१००

दिति तथा च हेतुतावच्छेदकसंबंधेन हेत्वधिकरणावच्छिन्नत्वस्य तत्र सुतरामभाव इति भावः एतेन संबं
धांतरेण कालवृत्तेः कालिकसंबंधेनापि नहृदित्वेन स्वरूपसंबंधेन गगनादेश्च निरूपणे तदाह तादात्म्य
संबं संबंधस्यापीति वृत्तिनियामक[illegible]मात्रस्य सत्त्वे तेन हेत्वधिकरणतानतिरिक्तावच्छेदे विषयत्व यानस्वरूपा न
संतद्भावविशिष्टनाशे साध्यवद्वृत्तित्वाभावस्याप्रसिद्धत्वेपि न व्याप्यसंगतिः अनियामकत्वादिति वृत्ति
नियामकसंबंधेन यत्साध्यवद्वृत्तित्वं तदभावावच्छेदकत्वानियामकत्वादित्यर्थः तेन संबंधान्तरेण स्वात्मि
न्नविद्यमाने तादात्म्ये न हेतौ नातिव्याप्तिः यद्वा अवच्छेदकत्वानियामकत्वादित्यस्य यथाश्रुत एवार्थः
न चैवं रूपवान् गगनादित्यत्र तादात्म्येन हेतुतायामतिव्याप्तिरिति वाच्यम् हेतुतावच्छेदकसंबंधेन हेत्वधि
करणत्वस्य तेन संबंधेन साध्यवद्वृत्तित्वस्य चाप्रसिद्धेन वहेतुतावच्छेदकसंबंधेन हेत्वधिकरणत्वस्य साध्यवद्वृ
त्तित्वस्य च लक्षणे प्रवेशेन तादात्म्यसंबंधेन तयोरप्रसिद्ध्या न तादात्म्यसंबंधेन सद्धेतावव्याप्तिरिति वाच्यम् प्रा
ञ्चां मतेन तादात्म्येन व्याप्यत्वानभ्युपगमेनेष्टापत्तेः अन्यथा सिद्धान्तलक्षणेपि स्थितत्वादित्याहुः तादात्म्येन

भवाटी॰ १०१ १५१

इ॰वह्निमान्धूमादि॰

व्याप्युपपादनमत्राभासः संगच्छते इति चिन्तामणिकृतामिति॰ केचित्तु॰ कालिकसंबंधेन गगनादेर्वृत्तित्वपक्षे कालो
घटवान् पटादित्यत्राप्यासेरभावेपि इदं सर्वविषयं घटादित्यादौ विषयितयाहेतुनापासाध्यसामानाधिक
रण्याभावस्याप्रसिद्ध्याव्याप्ति (रित्यतान्ययोन्यासंगतिरित्याह॰ अत्र केचित्साध्यवद्वृत्तित्वाभावेत्यादौ वह्नि [redacted]
सामानाधिकरण्याभावे हेत्वधिकरणमह्यानसावच्छिन्नत्वपर्यवसायवदभावविवक्षया॰ सत्वादव्याप्तिवारणा
यपत्वपतत्वयोरनुप्रवेशः अवच्छिन्नेत्यादि नचैवं सर्वविषयकघटादित्यादौ विषयितासंबंधेन हेतु
तापासाध्यवन्निष्ठत्वानादौ विषयितासंबंधेनवृत्तित्वस्य केवलान्वयितया॰ इत्थत्रापि गगनादेरेतद्
भावाप्रसिद्ध्याऽव्याप्तिरिति वाच्यं कपालावच्छेदेन घटवदादौ विषयितया नित्यत्वान्वृत्तित्वस्य भावप्र
सिद्धेः॰ तत्र च हेतुवृत्तित्वसत्वेपि हेत्वधिकरणावच्छिन्नत्वघटितोऽभावसत्वादव्याप्तेरभावात् प्रमेयं
घटादित्यादावपि प्रमेयत्ववतादात्म्याभावस्य घटावच्छेदेन घटत्वादावप्रसिद्धिरभावा[redacted]
सावयिप्रमेयत्ववतादात्म्याभावस्य घटावच्छेदेन घटत्वादावप्रसिद्धिरभावान्न तत्राप्यव्याप्तिरिति चेन्न राम

व्याप्यवत्तित्वेन ननर्थभावो पपादनरत्तिरूपशक्तितावच्छेदेन वह्निसामान्याधिकरण्याभावे हेत्वधिकरणपर्वताद्य
वच्छिन्नत्वसत्वेपि ध्रुमवत्तितावच्छेदेन नञर्थभावसत्वादिति भावः व्यभिचारितप्रतिप्रसंगरत्ति इत्यंसंतर्गहित्यारोह
मत्वसामानाधिकरण्याभा [redacted] वेगुणाद्यवच्छिन्नत्वसत्वे
विद्व्यवृत्तित्वावच्छेदेन नञर्थभावसत्वादिति भावः साध्यसामानाधिकरण्याभा [redacted]
[redacted] वृ धिकरणानायां उक्ताभावेनैव इष्टफलस्य साकरहो उक्ता व्यभिचारणासंभवेपि व्यासे वि
शिष्टैकरूपत्वा [redacted] भावोपलक्षणत्वानेननुगमश्चनिवोध्यं अपरेतु स्वनिष्ठेत्यादि एतन्मते केवलान्व
यिनि इदं वाच्यं ज्ञेयत्वादित्यादौ स्वनिष्ठसाध्यसामानाधिकरण्याभावाप्रसिध्या अव्याप्तिसंभवत्येव परं तु हे
पतेन नाम्नाव पितुं शक्यते न तद्दोषेणाशक्यं नलक्षणस्य मतभेदेनवहू षणी पत्वात् एवं द्वितीयलक्षणाभिप्रा
येणाविशिष्टितिकारादौ सार्वभौममतवर्णनविरोधापि यथाश्रुतार्थाभिप्रायकत्वेनतत्परिहारसंभवात् एतेहे
यं तस्माद्यस्यां शिवपरमाणुत्वाभाव वहित्याहिता कालिकसंबन्धवेशिकसद्धस्यातिरिक्तस्याभावा

भवा॰टी॰
१०२
102

हिति॰ भूतले घटस्तदानीं घट इति प्रतीत्योः संबंधांशे वैलक्षण्यं तत्कालिकसंबंधोऽतिरिक्तोऽभ्युपपत्तेः भूतले घट
इह घट इति प्रतीत्योरपि न संबंधांशे वैलक्षण्यं येन दैशिकसंबंधोऽतिरिक्तः स्यादित्याभिमानः ४ दैशिकसंबंधो
प्यतिरिक्तोऽभ्युपपत्त इति। न च तत्र मानाभावः भूतले घट इह घट इति प्रतीत्योः भूतलदेशत्वरूपविषयभेदादेव
वैलक्षण्योपनिर्वाहेण संबंधांशे वैलक्षण्याभावेनांगीकारादिति वाच्यम् पश्चाद्दिशि घटस्तत्पूर्वं पट इति प्र
वे तीतिरतिरिक्तदैशिकसंबंधं विना निर्वाहात्। न चैकस्मिन्देशे घटपटयोः संयोगसमवायौ स्तः न चैकस्मिन्भूतले
घटपटयोः संयोगसमवायत्वमतिरिक्तदैशिकसंबंधे [redacted] नेति वाच्यं भूतलसंयुक्तघटे भूतलासंयुक्तत्वदशायां विद्यमानेपि पटेन प्रा
प्रतीतेः न स्यात् घ यथा यद्गोत्वं तदाऽश्वत्वमिति प्रतीते निर्वाहार्थं कालिकसंबंधोऽतिरिक्तः स्वीक्रियते त
था उक्तप्रतीतिनिर्वाहार्थं दैशिकसंबंधोऽपीति तन्नेति विषयस्य प्रतीतिमात्रेव घसनाकत्वादिति भावः ८ घ
टे घटत्वाभावो विषयीक्रियते तत्र तस्य कालिकसंबंधेनेत्यादिः परमाणावपीति यद्यपि इह परमाणुत्वाभाव राम

२ त्वेनद्भूतलादृत्तिघटत्वाभाववदित्यादिप्रतीतेरपि निगमकाभावात्स्वरूपमात्रविषयत्वे घटादेरपि तद्विषय-२

इतिप्रतीतेः भूतलादिविषयकत्वेनाप्युपपत्तेः परमाणुविषयकत्वे मानाभावः तथापि इदानीं घटत्वाभाव
वदितिप्रतीतेर्विनिगमकाभावान्न स्वरूपमात्रस्यैव तद्विषयत्वं घटस्यापि तद्विषयत्वमिति भावः परे त्वित्यादि
कालो घटवान्परमाण्वाद्यन्यत्वादित्यादौ कालिकसंबंधेन हेतुतायां हेतुतावच्छेदकसंबंधेन वृत्तिमति परमाणुत्वादौ प
रमाणावायवच्छेदेन साध्यसामानाधिकरण्याभावस्यानवच्छेदकमेव हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं
काल इति न तत्राव्याप्तिः एवमन्यत्राप्यूह्यं पार्थिवपरमाणुरूपादिति इदं च पार्थिवपरमाणोरवच्छेदक
तानिरूपकस्यावच्छेद्याधिकरणासद्भावेप्यसद्दृशेनायत्नं उक्तक्रमेणेति न पर्वतीयेत्यादिना इदं च मतापरेशि
त्कमेतोस्यार्थः न स्वहेतोस्त्वाधिकरणमिति वह्निमान्धूमादित्यादौ धूमाद्यनधिकरणभूतलादिसंयुक्त
घटादिवृत्तेर्वह्निसामानाधिकरण्याभावस्यावच्छेदकमेव हेतुमावच्छेदकसंयोगसंबंधेन तद्धूमाद्यधिक
रणभूतलादिकमिति सव्याप्तिरतो हेतोश्चेति इत्थं च इदं चेतयत्वादित्यादौ केवलान्वयिनि हेतुतावच्छेद
कसंबंधेन वृत्तिमति घटनिष्ठविषयतादौ कालिकसंबंधेन घटादिसंबद्धपटाद्यवच्छेदेन वर्तमानस्य वाच्यत्व

मवा॰
१०३
103

सामानाधिकरण्याभावस्यानवच्छेदकोऽपि वह्न्यनुमितौ तेन घटत्वघटादिनिष्ठविषयताभिन्नाधिकरणं घटादि
रिति नाशङ्कनीयमिति द्वितीयलक्षणाभिप्रायेण तद्बोधितिग्रन्थाविरोधोऽपीति ध्येयं - नन्वेवमपि स्वीयस्वरू
पसंबन्धेन हेतौ वाकाशात्मान्यतरत्वाभावः व्याप्तिर्निरूपकत्वस्यैव तत्र हेतुतावच्छेदकस्वीयस्वरूपस
म्बन्धेन वह्निमति स्वस्मिन्नात्मत्वाभावरूपसाध्यसामानाधिकरण्याभावाभावादत आह: यद्वेति । ननु
नाहृश्याभावत्वावच्छिन्नं वह्निसामानाधिकरण्यघटसामानाधिकरण्योभयाभावे वह्निमत्त्वानि स्वप्र
तियोगिकत्वाभावासत्त्वाद्व्याप्तिरत आह: सामानाधिकरण्यावच्छिन्नत्वस्वत्वाभावप्रतियोगितेति उत्प
त्तिकालावच्छेदेन पर्वतस्तु इति । उत्पत्तिकालविशिष्टपर्वतावच्छेदेनैतत्पर्याः अत्यनुभवादिति हृदयन्तु भवेनोत्पत्तिका
कालविशिष्टपर्वतावच्छिन्नत्वस्य स्वप्रतियोगिवह्निमद्वृत्तित्वाभावेऽवगाहनादित्यर्थः । नवास्याः प्रतीतेर्व
ह्निमद्वृत्तित्वे उत्पत्तिकालविशिष्टपर्वतावच्छिन्नत्वाभावस्यानवच्छेदकत्वान्नासीति नियमस्य
यं वह्निमद्वृत्तित्वाभावावच्छेदकस्य पर्वतादेस्तत्र भावावच्छेदकत्वमिति केचिद्दाशे योनयुक्तः अनि राम

४ स्याभावावच्छेदकत्वं नास्तीति निरुक्तपमालायां वह्निमद्वृत्तित्वाभावावच्छेदकस्य पर्वतादेरभावावच्छेदकत्वमिति केचित् तद्धेयो न युक्तः प्रतियो

त्वविषयोऽस्त्विति वाच्यम् तादृशावच्छिन्नस्य प्रतियोगित्वेनाभुक्तत्वात् अत एव व्याप्तिकालविशिष्टप
र्वतेन वह्निमद्वृत्तित्वावच्छेदकताभावोऽपि नैतत्प्रतीतिविषयः तत्त्वावच्छेदकतासंबन्धेन वह्निमद्वृत्तित्वस्याभा
वत्त्वविशिष्टपर्वतेन विषयोऽस्त्विति वाच्यम् अवच्छेदकतासंबन्धस्य वृत्त्यनियामकतयाऽभावप्रतियोगि
तानवच्छेदकत्वात् अत्र प्रतियोग्यवच्छेदकाभावस्य तदभावावच्छेदकत्वं नास्तीत्येव नियमो न तु मात्रार्थो
नेन भावेनापि मानाभावात् प्रकृते च वह्निमद्वृत्तित्वरूपप्रतियोग्यवच्छेदकपर्वतमात्रस्य न तदभावाव
च्छेदकत्वं किन्तु व्याप्तिकालविशिष्टस्यैतस्येति व्यभिचाराभावात् [illegible]धिकरणाधिकरणमात्रावच्छिन्नेति हे
त्वधिकरणमात्रपर्याप्तावच्छेदकतानिरूपकस्यार्थः उत्पत्तिकालस्यापीति उत्पत्तिकालपर्वतेऽभयाप्युक्तार्थः एवं सति
धूमवांश्च हेरिसाद्यापः पिंडवह्निनिष्ठस्य [illegible] मवद्वृत्तित्वाभावस्यापन्नहेत्वधिकरणमात्रावच्छिन्नत्वं वस्तुव
यवस्याप्यनवच्छेदकत्वाद्धिनिकस्य विरूपराणां [illegible] सत्त्वं वस्तुवयवस्यानवच्छेदकत्वेऽपि नैव्यारनापाताः अयः पिंडमा २
त्रपर्याप्तावच्छेदकताया अनपायात् तदुत्पत्तिकालानभावे [illegible] पर्वतस्यावच्छेदकत्वप्रतीतिवत् तद्वस्तुवयवत्वांत

भवानी

१०४

104

~~वच्छेदकत्वमनीतिर्येन तदुभयोरवच्छेदकतापत्तिः स्यात् अयः पिंडो धूमवान् वह्नेः पिंडे धूमवद्भिन्नत्वमिति अयमो~~

मोवैतौ वायः पिंडे [illegible] स्यावच्छेदकत्वमनीतिर्येन तदुभयोरवच्छेदकतापत्ति

त्तिः स्यात् अयः पिंडो धूमवान्वह्नेरित्यत्र अयः पिंडेन धूमवद्भिन्नत्वमिति प्रतीतेः अत्र च हेत्वधिकरणनिष्ठभेदावच्छेदकत्व

देशानिष्ठविलक्षणसंबंधात्यंते न उत्पत्तिकालस्य धूमवन्निष्ठवह्निमद्भिन्नत्वाभावावच्छेदकत्वे पर्वतस्यापि कालो

पाधित्वेनात्यंतिकालरूपतया न ह्यवच्छेदकत्वं विना व्याप्तिः यत्तु हेत्वधिकरणभेदाभावावच्छिन्नत्वेन हेतुनावच्छेद

कसंबंधेन यद्धेत्वधिकरणं तद्वृत्तिरिक्तोपः कालस्य निष्ठावच्छेदकत्वानिरूपकत्वेसति ताहशाहेत्वकरणा निष्ठा

वच्छेदकतानिरूपकत्वं अयः पिंडो धूमवान्वह्नेरित्यादौ धूमवद्भिन्नत्वाभाववदवयवस्याप्यवच्छेदकत्वाद्धूमवान्महा

वह्नेरित्यादावतिव्याप्तिर्वारणाय कालेति निष्ठ पर्वतत्वपनिष्ठवह्निमद्भिन्नत्वाभावे पर्वतादेरिव कालविशेषस्याप्य

वच्छेदकत्वं प्राप्ता ताहशाभावाप्रसिद्ध्यापत्तेः न च व्याप्यवृत्तिताहशाभावे कालविशेषस्यापि नावच्छेदकत्वमिति

वाच्यम् तथा सति हेत्वधिकरणपर्वतादेरपि ताहशाभावे नवच्छेदकत्वापत्त्या हेत्वधिकरणावच्छिन्नताहशाभा

वाप्रसिध्यापत्तेः ईश्वरत्वानुपपत्ती व्याप्यावृत्तेरनावच्छेदकत्वस्वीकारस्तु देशविशेषस्येव कालविशेषस्यापि समानमिति १०४

कत्वनिष्ठविरोधभंजकावच्छेदकत्वनिवेशेनोक्ताप्रसिद्धिवारणेपिसंयोगी एतद्वृत्तित्वादियादेशेमतत्वविशि
ष्टेतद्वृत्त्यावच्छेदेनसंयोगावद्वृत्तित्वाभावस्यैतद्वृत्तित्वादौसत्वात्स्वात्मेः एतेनतादृशाभावप्रसंबंधातरेणाव
भेमानेनत्वलभइति प्रत्यग्दर्शनाद्याप्यवत्तौदेशाविशेषस्यावच्छेदकत्वंसार्वभौममतेननुकालविशेषस्येत्यु
क्तावपिननिस्तारइति यत्तुउत्पत्तिकालावच्छेदेनेति· उत्पत्तिकालविशिष्टपर्वतादावित्यर्थः नतदवच्छेदेन न ६
तद्विशिष्टपर्वताद्यवच्छेदेन· नसाध्यथोत्क्रमेवेति हेत्वधिकरणमिन्नावच्छिन्नत्वविवक्षणमेवेत्यर्थः ए
वकारेणायत्त्विस्मादिनोपदर्शितसमाधानस्यनिरासेके चित्तुसाध्यवद्वृत्तित्वाभावेसाध्यवत्वमुपलक्षणं
विषयतानिविष्टं· ननुविशेषणताविधाया· तथाचोपस्थितेविशिष्टघटाद्यवच्छेदेनगंधोपलक्षितनधर्मिव का
त्तित्वद्रूपवतियोगिनः पृथिवीविसत्वान्नन्तनदवच्छेदेननदभाववत्तिनन्तत्राव्याप्तिरितिप्राहुः तत्रहेत्वधिक
रणंगोधवद्वृत्तित्वाभावच्छेदकमेवनकिंत्वत्पत्तिकालएवेत्यपिकेचित्· पर्वतेरूपवद्व्हिमत्संयुक्तत्वन्नास्तीत्यादि
प्रतियोग्यवच्छेदा [illegible] धिकरणताहपादिसंवद्धत्वपर्वतादेरवच्छेदकत्वविषयीकर्त्वन्घटकोष्ठनसं

मबारी

१०५

105

वंधस्याप्यवच्छेदकत्वं विषयीकरोतीत्यभ्युपेत्य समनन्तरं परिष्कुर्वतां प्रकारमाह पर्वतेनेत्यादि तथा च यस्या
श्चिद्वह्निमान् धूमात् इत्यादौ निरुक्तिमन्नत्वसंयुक्तघटनिष्ठस्य वह्निमत्संयुक्तत्वाभावस्यावच्छेदक एव घटधूमान्य
तमसंयोगः स्यात् तेन हेत्वधिकरणामिष्टेति धूमसंयुक्तघटनिष्ठस्य वह्निमत्संयुक्तत्वाभावस्यावच्छेदक ट
एव घटधूमसंयोग इति नत्रैवाव्याप्तिः स्यादेनो हेतुनिष्टेति नोक्तं नन्वेवमपि द्रव्यं पृथिवीत्वादित्यादा
वव्याप्तिः तत्र गुणत्वादिनिष्ठस्य द्रव्यत्वाभावस्यावच्छेदकीभूतो यो गुणनिष्ठसमवायस्तस्य पृ
थिव्यामपि वृत्तेः समवायसैकत्वादिति वाच्यं हेत्वधिकरणावृत्तित्वावच्छेदेन हेतुतावच्छेदकसंबंधे
नाध्यवदवृत्तित्वाभावावच्छेदकत्वाभावस्य विवक्षितत्वात् समवायस्यैकत्वेपि पृथिवीवृत्तित्वावच्छेदेन द्रव्य
वृत्तित्वाभावावच्छेदकत्वाभावस्यानभ्युपगमादिति ननु संबंधस्यावच्छेदकत्वे प्रमाणाभाव इत्यत आ
ह अन्यथेति अवच्छेदकत्वापत्तेरिति तथा च पर्वतेन गगनेन वह्निमत्संयुक्तत्वमिति प्रतीत्यापत्तेरिति भा
वः अत एव संबंधस्यावच्छेदकत्वादेव वर्तमानेन स्तनमस्तीति अन्यथा हेतुतावच्छेदकसंबंधेन वर्तमाने राम

देशाः । तथा सति वाच्यत्वघटत्वाभावाभावस्यैव न यावद्धर्मस्य प्रसिद्ध्यातं परित्यज्य व्यधिकरणधर्मावच्छि
न्नाभावस्वीकृतसमगाधितया वाच्यत्वाभावप्रसिद्धिप्रतिपादनवैयर्थ्यात् नापि साध्यतावच्छेदकावच्छिन्न
प्रतियोगिताकाभाववत्त्ववृत्तित्वरूपेण हेत्वभिप्रायेण समवायित्वस्य साध्यतावच्छेदकतया समवायित्व द्वि
नवाच्यत्वाभावविप्रसिद्धिशंकापात् अनुत्थानात् किंतु साध्यतावच्छेदकसंबंधनियतप्रतियोगिताकाभावकू
टघटितत्वार्थे भावी यत्र कुत्रापि तत्सत्तापरिष्कारणाभिप्रायेण । नैव च प्रमेयसाध्यके विभूतनत्वभंगाभाव
प्रदर्शितं धर्मिकारकतावच्छेदकसमानाधिकरणत्वादिसकलत्वसाधारणत्वमेव प्रसंगात्प्रदर्शयतीत्यभिप्राय
वानाह स्वयं वक्ष्यमाणत्वपरसाधारणेति अयमाशयः भावत्वादिना अभावप्रदर्शकं भाववानभाववान्वेत्य
न्येति नेत्वनुमानयोर्व्याप्यत्वसाध्यकानुमानसमशीलतया पृथगाशंकानसमाधाने वा युक्त
मत आह यद्विति भवति मेयत्वसमनियतप्रतियोगिताकरणीति समव्यापकत्वशरीरप्रविष्टसाध्यतावच्छेद
कव्यापकत्वस्य तन्नत्व नियोगितावच्छेदकनिर्विशेषितयोगिताया: स्वरूपसंबंधात्मकत्वे न तन्न नियोगित्वं

मवारी

भवतीति भावः । तत्र एकावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनेति । न चैवं विवक्षितेऽपि घटत्वेन ४

व्यापकः साध्यतावच्छेदकव्यापकत्वासंभवेन साध्यतावच्छेदकप्रतियोगिताकाभावाप्रसिद्ध्यानानाव्य

१०७ क्तिसाध्यके ... व्याप्यव्यापत्त्यात्तदभावप्रतियोगितात्वेनैकवल स्पर्शोसाध्यतावच्छेदकसमव्यापक

107 त्वस्याविवक्षितत्वादिति भावः अथ तिरिति प्रमेयसाध्यकेऽप्यावत्वेनाभावत्वेन चाकाभावद्वयमादायप्र

स्य संसर्गेनरूपकत्वासंभवो नैव न्यभावस्य घटत्वेन पराभावाभिन्नतयानत्प्रतियोगितायाः पटीयसत्वा कि

भि त्कथं साध्यतावच्छेदकसमव्यापकत्वमिति वाच्यम् वह्नित्वेन वन्ह्यभावस्य प्रतियोगितायाः वह्निमात्र

निष्ठतया साध्यतावच्छेदकसमव्यापकत्वेन तादृशाभावमादायैव लक्षणसमन्वयात् । न चैवं वह्निमात्र वं

त्वा मयौ द्वित्वाद्येव वह्निभिन्नत्वेन वन्ह्यभावमादायाव्याप्तिः वह्नित्वेन वन्ह्यभावस्य वह्नित्वेन प्रमेयं नास्तीति प्र

मातीति सिद्धाभावाभिन्नतया तत्प्रतियोगितायाः प्रमेयमात्रसाधारणतया समनियतत्वाभावेन तादृ

शाभावस्यादूषकत्वेन गतत्वादिति वाच्यम् एकावच्छेदकावच्छिन्नत्वेऽवच्छेदकतानिरूपकेत्यर्थकतया [redacted]

वह्नित्वेन वन्ह्यभावस्याविवह्नित्वनिष्ठावच्छेदकतानिरूपकवह्निमात्रनिष्ठ ... निष्ठवह्नित्वसमयत राम

तस्यैकाव २ नि १०७

प्रतियोगिताकत्वप्राकृ टंतर्गतत्वात् । नैवं समवायित्वघटितावच्छेदकत्वाभावो घटादावप्रसिद्ध इति स्थूलासंगतिः
समवायित्वेन प्रमेयत्वाभावाभिन्नतया तत्प्रतियोगितायाः प्रमेयत्वादिसाधारण्येनावाच्यत्वसम
व्यापकत्वाभावादिति निरस्तम् । तन्मते लक्ष्यस्य यथाश्रुतसाध्यतावच्छेदकसमव्यापकत्वस्य लक्षणप्रवे
शाभिप्रायकत्वात् समवायित्वपदस्य धर्मान्तरोपलक्षणतया प्रमावाच्यत्वभिन्नत्वेन वाच्यत्वाभावमादाय
विवक्षितसमव्यापकत्वघटितलक्षणस्यापि तत्र सत्त्वात् । ननु कथं भावत्वाभाववत्वेति इदमुपलक्षणं स्वा
प्रतियोगिभेदेऽपि प्रतियोगितावच्छेदकैक्ये न प्रतियोगितैक्यमिति मते साध्यतावच्छेदकसमव्यापक
त्वं किंचित्प्रतियोगिताकत्वविवक्षणीयं प्रमेयप्रतियोगिताया अपि समव्यापकत्वेन तत्प्रतियोगिताकत्वेन निवेशेऽप्य
तावच्छेदकावच्छिन्नत्वविवक्षणात् प्रमेयत्वेनाविरहेऽपि भावत्वेन यादृशगगनभावत्वाभाववत्वावच्छिन्नप्रतियोगि
तायास्तन्मतप्रतियोगितात्वेन प्रमेयत्वसमव्यापकत्वाभावादित्यपि बोध्यम् । यदि च प्रतियोगिभेदे न प्रतियोगि
ताभेद इत्यभेदे न प्रतियोगिताभेद इति मतेऽपि साध्यतावच्छेदकव्यापकत्वं न तत्प्रतियोगिताकत्वेन व्यापकत्वं तु तद्भावीय

भवानी प्रतियोगितात्वेन विवक्षितत्वमित्यस्याभ्युपगन्तृत्वादिति तादृशकावच्छेदकावच्छिन्नत्वविवक्षणे प्रयोजनविरहान्नायम

१०८ स्वरसः इति ध्येयम् नैवमिति साध्यतावच्छेदकसमनियतप्रतियोगितावच्छेदकत्वविशिष्टमेयाभावमादाय लक्ष

108 णे: न याधनसमानाधिकरणात्यंतियद्यपि घटत्वेन प्रमेयसामान्याभावमादाय तत्र लक्षणसमन्वयः

संभवत्येव तथापि प्रमेयसाध्यके सर्वत्र तथाविधेकाभावमादाय लक्षणसमन्वयो न संभवतीति भावः

संभवतीत्यत आह नैतादृशाभावमादाय यावत्प्रमेयसाध्यके सर्वत्र लक्षणं न संभवति · विषयितया प्र

मेयसाध्यके नित्यज्ञानत्वादिहेतौ तादृशाभावस्य हेतुसमानाधिकरणत्वादिति वाच्यं · प्राचीनमते व्या

प्तेरधिकरणत्वगर्भतया विषयितासंबंधेन प्रमेयसाध्यके साध्याधिकरणत्वगर्भव्याप्तेरभावेन तस्या

लक्षणत्वाभावात् · वृत्तिनियामकसंबंधेन प्रमेयसाध्यके सर्वत्र गगनत्वेन प्रमेयाभावमादाय लक्षणा

गा समन्वयः संभवति · ननु वह्नित्वेन प्रमेयसामान्याभावमादाय सत्त्ववानात्मपटो गगनत्वादित्यत्र तीति च

न्यायाः इति मात्रवृत्तिनेत्येवोक्तेस्याप्य नसर्वजनसिद्धमिति तादृशप्रतीत्या गगनत्वेनाप्रमेयं नास्ति ग राम

तिविषगगनमात्रनिष्ठप्रतियोगिताया एव विषयीकरणादिति भावः नन्वेवं गगनत्वेन प्रमेयं नास्ति गगनत्वेन
गगनं नास्तीति प्रतीत्योरेकलक्षणाक्रान्तत्वापत्तिरिति वाच्यम् गगनत्वेन प्रमेयं नास्तीति प्रतीतावुक्तप्रतियोगितायां
प्रमेयत्वसामानाधिकरण्यस्याधिकस्य भानात् तथात्वेपि उक्तप्रतीत्योः प्रमेयमात्रस्य प्रतियोगित्वावगा
हनेपि वह्नित्वइदंत्वादिना नेति यद्यपि वह्नित्वेन प्रमेयाभावह्रदत्वेन प्रमेयाभावसमुदायाधिकरणस्याऽ
प्रसिद्धिः तथापि वह्निपदं रहितवह्निभिन्नत्वह्रदभिन्नत्वादिना प्रमेयाभावघटितत्वेन तत्समुदायाधिकरणा
प्रसिद्धेर्वाच्या न्यूनवृत्तिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताया इति न्नवह्नित्वह्रदत्वादिना
प्रमेयसामान्याभाववारणाय न्यूनवृत्तिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताभिन्नप्रतियो
गिताकत्वमभावे विशेषणमस्तु किं न्यूनवृत्तिसमानाधिकरणधर्मानवच्छिन्नप्रतियोगित्वसाध्य
तावच्छेदकसमव्यापकप्रतियोगित्वयोरेकाविवक्षणेतिवाच्यम् वह्नित्वेन प्रमेयाभावस्य वह्नित्वेन वह्न्य
भावाभिन्नतया न्यूनवृत्तिसमानाधिकरधर्मावच्छिन्नवह्निमात्रनिष्ठप्रतियोगिताकत्वेन तद्वारणा

भवाटी
१०९

हेतिं नचनद्धारस्तायत्तन्यूनवृत्तिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकान्यत्वमभावविश
षणमस्त्विति वाच्यं तथासति धूमवत्त्वे नष्टधूमाभावस्यापि धूमसामान्याभावाभिन्नतया स्वन्यून
वृत्तिसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकान्यत्वरूपविशेषणानाक्रान्ततया तद्दोषात्तद्व्याधिकरण
णधर्मावच्छिन्नाभावमादाय धूमवान्वह्नेरित्यादावतिव्याप्तिरिति दीधितौ व्यभिचारितत्वं व्यभिच
रितत्वपदं॥ नन्वव्यभिचरितत्वपदे योगरूढ्यापि स्वत्वात्पारिभाषिकमेवेत्यसंगतमत आह॥ योगान
दृष्टेति॥ तत्र योगस्य विवक्षा... रूपस्य स्यानाहरस्त्यर्थः॥ यदीति॥ अयमात्मा ज्ञानादित्यादा
वात्मत्वेनात्मत्वाभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्याऽव्याप्तिवारणाय यत्समानाधिकर
णादिति। यत्तु वह्निमान्धूमादित्यादावुक्तरीत्याव्याप्तिवारणाय तदिति। नन्वेवं वह्नित्वेन वह्न्य
भावस्य कालिकादिसंबंधेन स्वविशिष्टहेत्वधिकरणस्य पर्वतादेरप्रसिद्धत्वात्स्वविशिष्टत्वं विशेष्य
विशेषणभावव्यत्यासेन वाच्यम्। न च वह्नित्वेन वह्न्यभावस्य प्रतियोगिसमानाधिकरणाभावाद्व्याप्तिरेव राम
१०९

निवाच्यं ॥ वस्त्वधिकरणेकालिकसंबंधेनवृत्तित्वस्यवन्त्यभावेपिसत्वात् अभावस्यप्रतियोग्यधिकर
णावृत्तौसंबंधविशेषनिवेशप्रयोजनाभावात् नचवह्निव्यापकतावच्छेदकप्रतियोगिताकस्याकाशाभा
वाभावस्याकाशरूपस्ययावदन्तर्गतस्यस्वविशिष्टहेत्वधिकरणाप्रसिद्ध्यानव्याप्तिरेवेतिवाच्यं ॥ जग
वं नादेरपिकालिकसंबंधेनकालत्ववन्निरूपितयातद्विशिष्टस्यकालस्यैवव्याप्ययोगेनुरूपाधिकरणाप्रसिद् स्य
ध्यात् ॥ एवमपिवृत्तिमत्वमात्रविशेषणेनैवगगनरूपाभाववारणासंभवेहेतुसमानाधिकरणत्व
स्यवैयर्थ्यापत्तिरिति २२ द्रव्यविशिष्टसत्वाद्यात्मकव्यतत्वनद्रव्यत्वाभावस्यकालिकादिसंबंधेनहेतुसमा
नाधिकरणत्वेपितद्विशिष्टहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणाप्रसिद्धिः स्वविशिष्टहेत्वधि
करणावच्छेदेनेत्यत्रस्वविशिष्टत्वस्यसंबंधविशेषेण विवक्षितत्वतयाकालिकसंबंधेनतद्विशिष्टत्व
स्यानन्यस्यद्रव्यमात्रएवसंभवात्ततः स्यवृत्तान्तरेनप्रयोजनमाह ॥ अयमात्मेति ॥ स्वविशिष्टहेत्वधिकरणा
स्यघटस्यैवसिद्धिसंभवादाह । हेतुतावच्छेदकावच्छिन्नेति । निरूपकेतिविषयत्वयोः । विशेषस्येति । विशेष

भवानी लविद्यो१

२१०

110

ष्याभ्यामतिरिक्तस्येत्यर्थः अत एव विशिष्टप्रतीतिविषयभिन्नस्य संबंधत्वाभावादेव। किंतु स्फटि
काद्यवच्छेदेन तत्र तस्य स्फटिकादावपि न संबंधत्वं। लोहितः स्फटिक इति प्रतीतेः समवायसंसर्गाव
गाहित्वयाऽप्रामाण्यनियमादिति वाच्यं॥ विनिगमनाविरहेणास्य परंपरायस्येव स्वाश्रयसं
योगस्यापि तादृशप्रतीतिविषयत्वात्। तादृशप्रतीतेः प्रमात्वसंभवेः प्रमात्वस्यान्याय्यत्वाच्च। एते
न विशिष्टबुद्ध्यविषयस्य संबंधत्वनिरासेन एकनानाविषयत्वादीसाह्मिन्ना एकाधिकरणावृत्तित्वव्या
त्वयोः परिग्रहः सर्वस्य संबंधित्वादिति। न घाचान्मत्वाभावविशिष्टहेतुत्वधिकरणस्यात्मन एव प्रसि
द्धत्वपानद्रप्रसिद्धिः अप्रकाशा चाऽयमात्मा तानादित्या शवया सर्वाधिकरणायोपात्तस्याभावे हेतुसमाना
धिकरणत्वविशेषणस्य वैयर्थ्यमिति भावः न चात्मनुश्रात्मत्वाभावसंबंधित्वेपि न तस्य स्वाधिकर
णत्वं। स्वविशिष्टत्वस्य स्वाधिकरणत्वरूपस्येव विवक्षितत्वादिति वाच्यं। तद्धि वस्तुसंयोगाभावां
शे हेतुसमानाधिकरणत्वस्य अवच्छेदकतापर्याप्त्यधिकरणाद्यवच्छेदेन तत्र संबंधित्वस्येव विवक्षणा राम

२१०

नु। इति प्रत्यक्षमिति। न चात्मभिन्नमात्मन इत्यत्र नाहमात्मेत्यन हेतुतायामात्मत्वाभावस्योपाधितया आत्मा
त्मनि हेतोरात्मत्वाभावरूपोपाधिरिति प्रतीत्या आत्मन्यव्याप्यत्वसंबंधेनात्मत्वाभावस्य विषयीकर
णात् आत्मत्वाभावविशिष्टस्यात्मनः प्रसिध्या कथमव्याप्तिरिति वाच्यं। तत्रात्मत्वाभावउपाधिरित्यस्या
त्मत्वाभावरूपोपाध्यव्याप्यत्वमित्यर्थात्। एवं च तद्व्याप्यत्वव्याप्यत्वस्योपाधिरीधितिप्रथमप
क्षाभिप्रायेण। यदि वा तेन संबंधेन तत्सहचरितमिति द्वितीयपक्षे तत्रोपाधेयमेव हेतुसमानाधिकरणा
त्यन्ताभावविशेषणमिति ध्येयं। न च साध्येति। यत्समानाधिकरणेत्यत्र यत्पदेन साध्यव्यापकं तेन
परामर्श इत्यर्थः तेन शब्दगोत्वादिपक्षतया साध्यसमानाधिकरणपदघटितलक्षणस्याप्यसंभवं केवलान्व
यिनीति प्रत्यक्षं। द्वितीयलक्षणासाधारण्यमाह। मेयत्वानिति। अत्र संबंधसामान्येन मेयस्य साध्य
ताबोध्या। समवायेन मेयसाध्यतायामनुसमवायावच्छिन्नप्रमेयाभावस्य साध्यतावच्छेदकसंबं
धेन साध्यसामानाधिकरण्याभावादप्यसंगतेः दीधितौ साध्यतावच्छेदकावच्छिन्नव्यापकता

कताघटकविषयतासंबंधेनहेत्वधिकरणत्वावच्छेदेनप्रतियोगिसमानाधिकरणत्वादित्यर्थः॥व्याप ८

भवानी. वच्छेदकप्रतियोगिताकात्वमिति। साध्यतावच्छेदकावच्छिन्नस्यव्यापकतावच्छेदकप्रतियोगितायस्येति
१११ विग्रहः संबंधसामान्येनसाध्यनिष्ठव्याप्यत्वेनिसाध्यतावच्छेदकसंबंधेनव्याप्यत्वेनेति। व्यापकत्वंतुये
/// नसंबंधेनसंभवतितेनसंबंधेनवाच्यमनुतत्रसंबंधविशेषानिवेशने। वक्ष्यतिचग्रंथकारोव्याप
कत्वस्यसंबंधविशेषानियंत्रितत्वेपीति। संबंधसामान्यस्यव्याप्यतावच्छेदकत्ववद्व्यापकतावच्छेद
कत्वोपगमेधूमवान्वह्नेरित्यादौसंबंधसामान्येनधूमस्यापिसंबंधसामान्येनव्यापकस्यधूमादेरभाव
[redacted] स्यवन्ह्यधिकरणावच्छेदेनव्यापकताघटकसंबंधसामान्येनानप्र
तियोगिसामानाधिकरण्यसंभवः संबंधसामान्येनधूमानधिकरणस्यापिसंयोगेनवन्ह्यधिक
रणस्यसंभवात्वृत्तनतथातिव्याप्तिनिरासेनसंभवतीतिरूपेण्याह। ज्ञानसाध्यकरणेति। प्रति
योगिसमानाधिकरणत्वादिहीति तादृशव्यापकताघटकसंबंधेनेतितथाविधव्यापकत्वाघ
व्यापकताघटकपावसंबंधेनेत्यर्थः। अन्यथानथाविधव्यापकताघटकविषयतासंबंधेनउक्त। राम
१११

भावस्यप्रतियोगिसामानाधिकरण्यादित्यव्याप्तिताद्वस्थ्यात्। अवच्छेद्यविवक्षणीयत्वेनेति। सुखत्वसामाना
त्ममहाकालान्यतरत्वान्नित्यत्वानां नित्यत्वविषयकत्वादिसाहाय्येनाव्याप्तेर्वारणाय संबंधसामान्येन साध्यता
नवच्छेदकसंबंधेन वा साध्यनिष्ठव्याप्यत्वविवक्षायां तद्विवक्षणस्यावश्यकत्वादिति भावः॥ समवायेनज्ञा
नादिव्यापकस्य ज्ञानादेरिति समवायस्य तथाविधव्यापकतावच्छेदकयावत्संबंधांतर्गतत्वमुपपादयितुं॥ यदि
च संयोगेनेति॥ सांसर्गिकविषयतानिरूप्यतात्मनिष्ठविषयतात्वस्याभ्युपगमे परंपरया तद्वैशिष्ट्यसंबंधत्वमित्यस्य वक्तुं
शक्यत्वाद्यदि च स्युक्तं गौरवमिति। तन्मुपत्तत्वस्यान्यतमत्वादिना संबंधत्वमानाभावात् संबंधसामान्य
नव्याप्यत्वादिकं न भवतीत्यपि द्रष्टव्यं॥ तदा साध्यनिष्ठव्याप्यतासाध्यतावच्छेदकसंबंधेनेति। यद्यपि सा
ध्यतावच्छेदकसंबंधत्वमपि [illegible] नैकं सर्वसाधारणं॥ तथापि संयोगसमवायादिसंबंधेन साध्यता
यां संयोगत्वसमवायत्वादीनां संबंधानामप्रवेशात् तत्तद्यावहीदोषः॥ न च संयोगसमवायादिभेदेन व्याप्तिभेद
प्रसंग इति॥ समवत्वन्यतमत्वे न संबंधानामप्रवेशान्न तत्संसर्ग इति वाच्यं॥ व्यापकताघटकसंबंधघटकत्वे

नसाध्यतावच्छेदकसंबंधस्यत्वस्य हेतोरपि प्रवेशेन तन्मते हेतुव्याप्तिभेदस्य त्वावश्यकत्वात्॥ एवंच संबंधसा
मान्यस्य व्याप्यत्वाघटकत्वेन साध्यतावच्छेदकसंबंधेन साध्यनिष्ठव्याप्यत्वाभिधाने च॥ साध्यतावच्छे
दकावच्छिन्नसाध्यवदिति ॥ एवंच तेन साध्यतावच्छेदकावच्छिन्नेत्यनर्थकं। विशिष्टसत्तावान् ज्ञातेरित्यादौ
संबंधसामान्येन सत्ताप्रति संबंधसामान्येन द्रव्यत्वतदभाववान्यतरस्य केवलान्वयिनो व्यापकतया
घटकत्वेन तदभावस्य पर्याप्तत्वेन तस्य साध्यतावच्छेदकसमवायसंबंधावच्छिन्नविशिष्टसत्तानिष्ठव्याप्यतानि
रूपितव्यापकताघटकयावदन्तर्गतसमवायेन हेत्वधिकरणावच्छेदेन प्रतियोगितासामानाधिकरण्यवि
रहादेवातिव्याप्तिविरहात्। परंतु साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यनिष्ठस्य तत्र साध्यतावच्छेदकाव
च्छिन्नसाध्यनिष्ठत्वं वाच्यम्। अन्यथा विशिष्टसत्तावान् ज्ञातेरित्यादौ समवायस्य साध्यतावच्छेदकसं
बंधावच्छिन्नसाध्यनिष्ठव्याप्यतानिरूपितत्वादेशान्यतराभाववृत्तियोगिनिष्ठव्यापकताघटकत्वेना
वेनातिव्याप्तितादवस्थ्यात्। तदानकल्पन्तुल्यप्तु व्याप्यताघटकत्वव्यापकताघटकत्वस्यापासम्भवे त्यत

त्वेन विशिष्टसत्ताभावानुयोगितेत्यत्र तादृशान्यतराभावस्य यावत्संसर्गेण तत्प्रतियोगितासिद्धिवारकद्रव्यत्वाभावसं
ग्रहार्थं प्रतियोगितादिविशेषणतावच्छेदकत्वघटकव्यापकताशरीरेऽपि साध्यतावच्छेदकावच्छिन्नत्वनिवेशनमाव
श्यकं एवं च साध्यतावच्छेदकावच्छिन्नव्यापकत्वेत्यादिदीधितिग्रन्थोऽपि पथ्याम्नुजः संगच्छते। पूर्वकल्पे नु सं
संसर्गघटकतया साध्यतावच्छेदकावच्छिन्नत्वपरतात्पर्यस्य स्यादिति भावः। गोत्वत्वेन किमपि प्रमेयं
नास्तीति प्रतीतिसिद्धाभावसमनैयत्येनेति। हीनोपलक्षणाभिप्रायेणैवेतत् एवमग्रेऽपि क्वचित्कविशेष्यं
तेन प्रथमलक्षणस्य समनियताभावभेदाप्रसिद्ध्याव्यापकत्वेऽपि न क्षतिः। व्यापकतायाः संबंधविशेषानियंत्रित
त्वेऽपि। व्यापकतायाः साध्यतावच्छेदकप्रतियोगितावच्छेदकतात्मकसंबंधविशेषावच्छिन्नत्वनिवेश
प्रयोजनाभावादिति भावः। यद्यपि प्रकृतव्यापकतायाः साध्यतावच्छेदकसंबंधनियंत्रितत्वविरहेण द्र
व्यत्वस्य व्यापकत्वापत्तिर्भवत्येवेति संबंधविशेषानियंत्रितत्वोक्तिरयुक्ता एवं च समवायेन साध्य
तायां द्रव्यत्वस्य संयोगेन व्यापकत्वमादाय तस्य मारणामसंभवविरहाज्ज्ञापकं॥ न च समवायसंबंधेन साध्य

भवा॰
११३
113

तायामपिसंयोगसंबंधावच्छिन्नद्रव्यत्वाभावस्यसाध्यतावच्छेदकसमवायेनव्यापकत्वस्यसुघटमिति
समवायेनतदभावमादायतत्राप्यव्याप्तेः सत्वादसंभवः साध्यतावच्छेदकसंबंधेनव्यापकत्वाभिधानेव्या
प्येवेतिवाच्यं तथापिद्रव्यत्वाद्येकैकाभावमादायासंभवापपादपरमार्थेनघाभिधानात्। विषयितास
बंधेनकस्यचित्पदार्थस्यासंबद्धित्वाभावेकेनैतेनसंबंधेनसाध्यतायामव्याप्तेरभावेनासंभवासंभवाच्चापि
नसंबंधेनेति। इदंचप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणात्यन्ताधिकरणतायामस्त्वितिसंयोगे
न। संयोगादिनानेनविषयत्वादेरपिसंग्रहः ननुसर्वेषांवाभावस्ययत्किंचित्प्रतियोगितावच्छेदकावच्छि
न्नसमानाधिकरणत्वात्प्रयोगिव्यधिकरणाभावाप्रसिद्धिरतः स्वप्रतियोगितावच्छेदकावच्छिन्नस
मानाधिकरणाभिन्नत्वंतदर्थोवाच्यः॥ तत्रचस्वपदंयत्तत्प्रयोगिपरं॥ नहिसंयोगेनद्रव्यस्याव्याप्यवृत्तित
यासंयोगेनस्वप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरणाभिन्नाभावाप्रसिद्ध्यासंयोगेनद्र
व्यत्वस्याव्यापकत्वान्नसंभवतिकिंचसंयोगेनद्रव्यत्वाभावमादायासंभवस्तत्रआहग्राहीतिआहिता राम

व संयोगसंबंधावच्छिन्नद्रव्यत्वाभावस्य ग्रहणात्तथा च तस्य समवायरूपव्यधिकरणसंबंधेन साध्यव्यापकत्वा
पत्त्या समवायेन तदभावस्य यावत्त्वं तस्य प्रतियोगिनो द्रव्यत्वाभावस्य व्यापकताघटकसमवायसंबंधेना
धिकरणाप्रसिद्ध्या असंभव इति भावः यत्किंचित्त्वमिति स्वपदस्य प्रतियोगिपरतया स्वप्रतियोगिव्यधि
करणपदार्थत्वादिति भावः तस्मात्संबंधसामान्य इति॥ इदं वाच्यं येन त्वादित्यादेः प्रमेयत्वादेः स्वरूपसंबंधे
नाव्याप्त्वं निष्ठप्रतियोगितारूपप्रतियोगितावच्छेदकविशिष्टप्रतियोगित्वघटितत्वोभयाभावस्य सत्त्वाद्व्या के
चे प्यत्वादिति निष्ठप्रतियोगिताया अवच्छिन्नत्वादिव्यापकतावच्छेदकत्वं न स्यादतः सामान्य इति। यत्संबंधत्वव्यापक
त्वार्थकं तेन समवायस्यैकत्वेन तत्तत्सामान्यपदार्थाभावेऽपि न तेन संबंधेन व्यापकत्वक्षतिः यत्संबंधसामा
न्ये साध्यवद्यत्किंचिद्व्यक्त्यनुयोगिकत्वाभावस्तु कोचान्वयः। यत्संबंधसामान्ये साध्यवद्यत्किंचिद्व्यक्त्य
नुयोगिकत्वाभावस्तत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वविरहात् यामपि समवाये वह्निमद्यत्किंचिदनु स
योगिकत्वाभावाभावेन तेन संबंधेन द्रव्यत्वादिति निष्ठप्रतियोगितायां व्यापकतावच्छेदकत्वानुपपत्तिरतः

प्रतियोगिकत्वान्न। द्रव्यत्वनिष्ठप्रतियोगित्वावच्छिन्नमलत्वादिनिष्ठप्रतियोगिताविशिष्टप्रतियोगिकत्वं
वह्निमद्घटे किंचिदुच्यत्वानुयोगिकत्वोभयाभावस्य समवाये सत्वाद्द्रव्यत्वनिष्ठप्रतियोगिताया: समवायेन
वह्निव्यापकतावच्छेदकत्वं न स्यादतो यादृशप्रतियोगिताविशिष्टत्वमपहाय यादृशप्रतियोगितावच्छेदक
विशिष्टत्वमुक्तं। यादृश्या: प्रतियोगिताया यदवच्छेदकं न हि शिष्टत्वार्थ: समवायसंबंधपर्याप्तत्वनिष्ठप्रति
योगित्वावच्छिन्नप्रतियोगिताविच्छेदकविशिष्टस्य घटत्वप्रतियोगिकत्वाभावस्याभावेन सा प्रतियोगिता
पत्त्येऽनेनोपादानुशस्या प्रतियोगित्वं तदस्य च न वच्छेदिकेति घटत्वादिनिष्ठप्रतियोगितेति न तस्या
समवायेन वह्निव्यापकतावच्छेदकत्वापत्तिरतो ऽनुयोगिकत्वान्न। समवायसंबंधे वह्निमदनुयोगिकत्व
घटितोभयाभावस्याप्यभावात् दोषतादवस्थ्यमतो यत्किंचिदिति। यादृशप्रतियोगितावच्छेदकवि
शिष्टानधिकरणत्वगर्भतायां द्रव्यत्वनिष्ठप्रति...योगिताया: संयोगेन वह्निव्यापकतावच्छेदकत्वापत्ति
रनुभयाभावानुसरणं। अत एव यादृशप्रतियोगितावच्छेदकविशिष्टे...त्यस्य स्थाने यद्विशि राम

न्निष्ठाभावे प्रतियोगितैव्यधिकरणानुपादानेऽयं घटएतत्घटपटान्यतरत्वादित्याहावा ५

कुं इतिनादृशप्रतियोगितानवच्छेदकेत्यस्यस्थानेतन्निष्ठेतिवक्तुंशक्यंलाघवान्नव्याप्तिपर्याप्तेर्निवेशोऽत्रैवेय्यर्था
दृशेषः पूर्वोक्तोभयाभावघटितव्यापकतावच्छेदकत्वनिवेशेगौरवादित्यभिप्रायवानाह। येनसंबंधेनेति। प्रति
पद्व्याप्तिः पूर्ववदुन्नेया। व्यधिकरणधर्मावच्छिन्नाभावमादायव्यापकत्वाप्रसिद्धिवारणार्थंसाध्यवन्नि
ष्ठाभावप्रतियोगितैव्यधिकरणंयन्नेदृशमपि तत्त्वनवच्छेदकमित्यत्रभेदीयप्रतियोगितायांसामानाधि
करण्यावच्छिन्नत्वलाघवादित्यभिप्रेत्याह। वस्तुतस्त्विति। ननुसाध्यवत्तिव्याप्तिः घटत्वाधिकरणेतमष्टा
यत्वाभावस्यकालिकसंबंधेनवृत्तितयातत्पटास्यत्वादितिप्रतियोगितायाव्यापकतावच्छेदकत्वाभावेनके
वलान्वयिताविच्छेदकवाच्यत्वादिति प्रतियोगितायाएवतद्घालेननतन्निरूपकव्यधिकरणधर्मावच्छिन्नाभाव
स्यप्रतियोगिसामानाधिकरण्यादन्तत्राह। साध्यवन्निष्ठत्वंचेति। दैशिकविशेषणतानाविशेषणेनेति। अभा
वीयविशेषणतेयत्यर्थः घटासमानकालीनस्यपटस्यव्यभिचाराधिकरणात्वनइन्यत्वाभावस्यनतत्पूर्वतनि
ष्ठरूपसाहित्स्वरूपस्यकालिकसंबंधेनापिनघटवृत्तित्वमनतानतद्घटपटेति। एतत्कालीनघटपटेत्यर्थःअ

भवाटी
११५
115

नरावप्रसिद्धव्यभिचारिपरित्यागः अथैवं प्रतियोगिवैयधिकरण्यघटितव्यापकतानिवेशप्रयुक्त
विवक्षणाप्रयुक्तगौरवस्य सत्वात्कथं गौरवेण तत्घटितव्यापकतापरित्यागः न चोक्तविवक्षणास्य प्रति
योगिवैयधिकरण्यघटितव्यापकतायां प्रतियोग्यधिकरणत्वांशे व्यापकताघटकताभिज्ञानसंबंधा
वच्छिन्नत्वविवक्षणेनासाम्यमिति वाच्यम् । तथापि प्रतियोगिवैयधिकरण्यघटितव्यापकतानि
वेशे ऽभावेहेत्वधिकरणवृत्तित्वस्याभावीयविशेषणतानविशेषणतावच्छिन्नतया गौरवस्य दुर्वारत्वात्
अन्यथा वह्निव्यापकतावच्छेदकप्रतियोगिताकस्य पर्वतत्वाभावाभावस्य पर्वतत्वस्य हेतुसमानाधिकर
णस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावादव्याप्तिः स्यादिति चेन्न । भावाभाव
साधारणविशेषणतानभ्युपगमप्रतियोगिवैयधिकरण्यघटितव्यापकत्वस्योक्तत्वेन पर्वतत्वाभा
भावनिष्ठप्रतियोगिताया वह्निव्यापकतावच्छेदकत्वाभावात् पर्वतत्वाभावाभावस्य पर्वतत्वस्य तादृशवि
शेषणतया वह्निमति सत्वादिति । न क्षतिः न घटत्वनिष्ठप्रतियोगिताया व्यापकतावच्छेदकत्वापत्त्या तन्नि राम
११५

रूपकाभावस्यपावद्वंतर्गतस्य हेतुत्वधिकरणावच्छेदेनप्रतियोगिसामानाधिकरण्यविरहादसंभव इत्यर्थः।
अवच्छेदकघटाभावत्वावच्छिन्नभेदस्यावच्छेदकेपिसत्वादाह। अवच्छेदकत्वावच्छिन्नेनेति। ननु अवच्छेदकभे
दनिवेशेन। नन्वीदृशाभावस्यप्रतियोगिनाप्रतियोगितावच्छेदकविशिष्टप्रतियोग्यप्रसिद्ध्याकेवलान्व
यित्वापपादनायवन्हेर्वह्न्या किंयेन ननु इत्यत्वेपि मानाभावादिति सामानाधिकरण्येन नत्र नवच्छेदक
त्व इत्यत्वनिष्ठप्रतियोगितायाप्रसिद्ध्येत्यत आह। इतिप्रतीतिसिद्धाभावेति। न यावद्द्रव्यत्वप्रतियोगिकत्वाव
गाहिनीदृशप्रतीतिस्वतस्याइव्यापिवृत्तित्वेमानमिति भावः। ननु प्रतियोगिव्यधिकरणपाघटितन यथोक्त
व्यापकत्वस्यलक्षणघटकेवस्वविशिष्टपदव्यारत्तिरीक्षितेव वक्ष्यमाणानसंगच्छते कपिसंयोगाभावनिष्ठ
प्रतियोगितायाः कपिसंयोगाभावप्रतियोगिनाहशाव्यापकतावच्छेदकत्वविरहादित्यत आह यथावैवमिति।
।तत्रैवेति। आकाशाभावनिष्ठप्रतियोगितायाः प्रतियोगिव्यधिकरणघटितकपिसंयोगाभावव्यापक
तावच्छेदकतापादिपस्यात्यतन्निरूपकाभावमादायाव्याप्तिवारणायेवन्तद्विशेषणस्यावश्यकत्वादिति

११६ 116

भावः॥ ननु व्यभिचारिणि साध्यत्वाद्यभावस्योक्तत्वेऽपि सर्वेऽत्र वा व्यत्वाद्यभावस्येति कथमुक्तमत आह याव
त्स्वरूपविनेति नाव्याप्तिसंभवो वेति निर्देशयितुमिति। यावत्पदाभावेऽव्याप्त्यसंभवयोरभावेन तद्वारणरूपप्र
दित्साहि प्रागुपात्तविशेषणानां प्रयोजनं न संभवतीति तत्प्रयोजनमप्रदर्शयं वचरमापादनस्यापि यावत्त्ववि
शेषणस्य प्रयोजनं प्रदर्शितमिति बोधनाय तत्प्रदर्शनस्यावश्यकत्वादिति भावः॥ यद्यपि नाव्याप्तिरित्य
नेनैव नासंभवस्य स्वत्वाभावसंभवोनेत्यभिधानमनुपयुक्तं तथापि यावत्त्वाद्यभावे यत्समानाधिकरणादि
पदानामव्याप्तिवारणरूपं साध्यतावच्छेदकावच्छिन्नेत्यादिविशेषणस्य गोत्वाभावमादाय संभववारणा
रूपं च प्रयोजनं न संभवतीति शिष्यबुद्धिवैशद्यार्थमेवमुक्तमित्युक्तिरिति ध्येयम्। तथात्वादित्यत्र तथाशेषेण विशे
~~षणतया तत्त्वमित्युपस्थापितत्वमिति शेषः॥ तथात्वादित्यत्र तथाशेषेण विशे~~षणतया तत्त्वमित्युपस्थापित
स्य समानाधिकरणपदस्य परामर्शः। ननु यः अभाव इति पूर्वोपस्थितत्वात्त्वाद्यभावपरामर्शः। न्यायसंभ
वेऽपि यत्कृतानुपयोग इत्यत आह तथाशब्दपरामर्शनीयं देशपतिप्रतियोगिसमानाधिकरणत्वादिति। ननु सा राम

११६

भाव ध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्यं इति। न च गुरुधर्मावच्छिन्नसाध्यकेऽव्याप्तिरिति वाच्यं॥ साध्य
तावच्छेदकादीति किं साध्यवन्निधर्मानवच्छिन्नप्रतियोगिताकाभावस्यान्तर्यत्वात्॥ एवं च सद्धेतौ व्य
धिकरणधर्मावच्छिन्नसाध्याभावमादाय यत्र लक्षणासंगतिः प्रतियोगिसामानाधिकरण्यं च साध्यतावच्छे
दकसंबंधेन बोध्यं॥ तेनात्र यमात्मा ज्ञानमहाकालान्यतरत्वादित्यादौ नातिव्याप्तिः एवं च वह्निमवान्यहेरि
त्यादौ गुणत्वद्रव्यसामान्याभावमादाय अतिव्याप्तिवारणाय यावत्त्वमभावविशेषणमिति ध्येयं॥ साध्यवद्
अन्यवृत्तित्वपक्षे गौरवादाह॥ साध्यतावच्छेदकव्यापकेति॥ अत्रापि यावत्त्वमभावविशेषणत्वेन बोध्यं॥
यावत्त्वविशेषणप्रयोजनस्य पूर्वमेवोक्तत्वात् यावत्त्वविशेषणहानौ हेतुत्वमयुक्तमत आह निरुक्ताभावेति
॥यद्वा॥ साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकस्य स्वस्य यथाश्रुत एवार्थः सद्धेतौ व्यधिकरणसंबंधावच्छि
न्नाभावमादायैव लक्षणासमन्वयः यावत्त्वस्याभावेनोपादेयप्रयोजनाभावात्॥ एवं हेतुसमानाधि
करणत्वस्वविशिष्टत्वादिकमपि॥ समयवह्निमान् धूमादित्यादौ नादशाभावप्रसिद्धेः पूर्वोक्तास्वरसा

म॰व्या॰टी त्वाह॥ साध्यतावच्छेदकव्यापकेति॥ बहुव्रीह्याश्रयणात्साध्यतावच्छेदकनिष्ठव्यापकताकेत्यर्थः ननु
११७ साध्यतावच्छेदकव्याप्यवृत्तियोगिताकेत्यर्थः॥ सामानाधिकरण्यांशनिवेशगौरवात्॥ अत्रापि या
117 ग वत्त्वहेतुसमानाधिकरणात्वस्वविशिष्टत्वान्यतरैद्यानिष्प्रयोजनाभावात्॥ पूर्वकल्पात्रयोद्भ्याहि प्रथमकल्प
एवहि नियकल्पे साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्मानवच्छिन्नाभावे साध्यतावच्छेदकव्यापक
प्रतियोगिताकाभाववायावत्त्वविशेषणावश्यकत्वस्पष्टत्वतन्नयोक्ताभावयोरन्यतरस्यानिवेशेनैवोपप
त्तौ यावत्त्वं किमर्थमुपात्तमित्याशंक्याह न एवमस्मात्वाहि प्रथावतासंभवात् निरुक्ताभावस्यानेउ
क्ताभावान्यतरस्य निवेश एव कुतो न कृतं तत्संनिवेशेनापि निरुक्ताभावनिवेशवारणीयायागोत्ताभावं
तत्साध्यव्यक्त्यभावधारायच्च व्याप्तेर्नीरणादित्याकांक्षायामेत एवत्याहिप्रथावतासेनसंभवति ता
दृशाकांक्षायाः साध्यतावच्छेदकेत्यादीतिप्रथोत्तरमेवोत्थितत्वात्सर्वेनादृशाकांक्षाविरहात् धूमवान्वह्ने ना
रित्यादौ धूमत्वेन धूमाभावस्य हेत्वधिकरणावच्छेदेनशक्तियोगिसामानाधिकरण्याभावान्नातिव्याप्तिः राम

नवच्छिन्नत्वेन धूमाभावस्य वह्निधूमोभयाभावाभिन्नतया वह्निरूपप्रतियोगिसामानाधिकरण्यादिति व्या
प्तिः इति वाच्यं तादृशातिव्याप्तेर् निरुक्तसाध्याभावे पावकत्वोपादानेऽपि संभवाच्च । किंचान्यत्वाद्यभावस्याप्यय ६
पिंडान्यत्वगगनाभावोभयाभावात्मकतया गगनाभावरूपप्रतियोगिसामानाधिकरण्यसत्त्वादित्य भिध्ये
१ त्यत्वप्रसिद्ध्याभिचारित्वामपि तं परित्यज्य यद्धि नो भूतलमनन्तत्वाभयत्वाद्युक्तमिति ध्येयं । प्रतियोगि
वैयधिकरण्याघटितेन तिरिद्धपत्त प्रतियोगितानापा स्वरूपसंबंधरूपत्वेन तत्वाभावीयप्रतियोगि
तायाः च तद्देशघटितभावाविशुद्धानन्तरं कनत्यावालनीन्यायेन साध्यवन्निष्ठप्रतियोगिताव्यधिकर
८ णाभावप्रतियोगितानवच्छेदकत्वेन नरभावरूपप्रतियोगितावैयधिकरण्यघटितव्यापकत्वमपि न संभव
तीत्यपि बोध्यं शर्वीकास्वरसेन मनोन्यत्वाभावानुसरणसंभवे कैमुतिकन्यायेनन्तकथनम । नु चित
मित्याहुरित्यनेनास्वरसः सूचितः । अत्र यद्यपि साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियो
गिताकाभावः यद्धेतुतावच्छेदकावच्छिन्नहेत्वधिकरणावच्छेदेन व्याप्यताघटकसंबंधेन प्रतियोगिसमा

गो लाघवभावस्यापि पूर्वं हेतुसमानाधिकरणात्यन्ताभावविशिष्टस्याभावरूपप्रतियोगिसामानाधिकरण्यमस्त्येवेति वाच्यं । साध्यतावच्छेदक

नाधिकरणास्तत्वं लक्षणमनुचितं तथा सति यावत्वे हेतुसमानाधिकरणात्यन्तत्वस्याविशिष्टत्वविशेष

णानाम प्रवेशेन लाघवात् नैवं वह्निमत्त्वमहानसीयो भूयवान्महानसीयत्वादित्याही वति व्याप्तिसंभवति ता

दृशोभयाभावप्रतियोगिताघटकव्यासज्यवर्तित्वेन तस्य साध्यतावच्छेदकावच्छिन्नव्याप्यताव

ग्प च्छेदकत्वाभावात् व्यासज्यवर्तितेनुकेवलमहानसत्वस्य प्रतियोगितानाश्रयतया हेत्वधिकरणा

मनेवच्छेदेन प्रतियोगिसामानाधिकरण्यविरहात् तथापि तन्मयमहानसत्वस्य शोभयादिवेशे

न तस्य प्रमाणान्तरत्वादहो षः केचित्तु साध्यतावच्छेदकावच्छिन्नव्याप्यतावच्छेदकत्वमित्यत्र व्या

प्तिपदं हि साध्यतावच्छेदकावच्छिन्नाभाववद्वृत्तित्वरूपा स्वन्यायकतावच्छेदकसाध्यतावच्छे

दककत्वरूपा वा निविष्यते तदा गुरुधर्मावच्छिन्नसाध्यका व्याप्तिः परिभाषिकावच्छेदक

त्वप्रवेशेन गौरवमतस्तथा लक्षणान्तरमित्याहुः तद्धितो गौरवाल्लाघवभावस्येति संबंधेन प्रतियोगिसामानाधि

मा करणस्याथैन्मा कालपरिमाणादिसाधारणत्वव्याप्तिवारणाय वावशंयविरहात्प्रतीयतया तदभावादिति राम

हिसंबंधेन धूमाधिकरणे धूमानयवच्छिन्नस्य वह्न्यभावस्य पर्वतादेः कालोपाधित्वसम्बन्धि पर्वताद्यपकर्षकत्वेहेतु 6

एतद्रूपवन्नित्वइसाहित्याद्दोलक्षणसत्वेनासंभवासंभवादाहिंह्व्याप्तिरित्यर्थ इति इत्युक्त्वापीत्यपि

कारेणतादृशप्रतियोगितानवच्छेदकप्रतियोगिकत्वापेक्षयातद्दृत्तिप्रतियोगिकत्वस्य गुरुतयातव्याः वच्छिन्नं

नयुक्तमिति स्यचितप्रमेयत्वादिनेतिद्धित्वावच्छिन्नाभावमादाय व्यापकत्वाप्रसिद्धिवारणायानवच्छेदक

घटितव्यापकत्वस्यावश्यवक्तव्यत्वात्त्वानधिकरणासाध्यवन्निष्ठाभावप्रतियोगित्वरूपव्याक

त्वस्यतादृशाप्रसिद्धिवारकत्वेपिअहृतलक्षणेनतस्याप्रवेशान्नैवयर्थ्यमितिभावः ननुवह्निमान्धूमा

दित्यत्र समवाया [redacted]

[redacted] करणावच्छेदेन प्रतियोगिसामानाधिकरण्य

सत्वेपिचरमकक्षियात्मकनिरुक्ताभावस्यनेहत्वधिकरणायवृत्तादेःप्रतियोगिसामानाधिकरण्येच

रमकक्षियायाः पर्वतासमानकालीनत्वेनकालिकतयापिपर्वतेप्यवृत्तित्वादहेतंप्रसिद्धसाध्यकानुमा

नेपक्षाकिमर्थमित्याकाङ्क्षायामाहवह्निमान्नित्यादिःपमा [redacted]धिकरण

भवानी
१२९
119

[redacted] महाकालवृत्ते
रित्यनेन संबंधात्तेरणाहेत्वधिकरणेऽवृत्तित्वप्रतियादितं निरुक्तरूपशालिनः साध्यतावच्छेदकाव
छिन्नव्यापकतावच्छेदकप्रतियोगिताकस्य ॥ ननु धूमानधिकरणपरमाणौ चरमक्रियात्मकस्यत
थाविधाभावस्य स्वविशिष्टहेत्वधिकरणाप्रसिद्ध्या तत्राव्याप्तिरेवेत्यत आह महाकालादेरिति संयोगेन
हेत्वधिकरणत्वसंभव इति इदं च वह्निनियामकसंयोगत्वेन संयोगस्य हेतुतावच्छेदकसंबंधत्वाभिप्राये
णान्यथा तादात्म्येन हेतुतानुरोधेन हेत्वधिकरणावच्छेदेनैतत्त्रेहेतुसंबंधित्वमात्रस्यैव विवक्षितत्वे
न महाकालादेः संयोगेन धूमाधिकरणत्वापत्त्या इनप्रयासवैयर्थ्यात् ॥ न माद्येति साध्यतावच्छेदकाव
छिन्नसाध्याभावमादायेत्यर्थः न संभवतीति तथा च तत्राव्याप्तिप्रतियास्नार्थमुदासीनचरमक्रियाघा
त्मकाभावानुसरणात्केऽणमाद्यहि [redacted] त्यात्मत्वे साध्यत्तुक्तमिति भा
वः मात्मकपरमाणुमहाकालादेः संयोगेन धूमाधिकरणत्वमस्तु च चरमक्रियात्मकाभावमादाय राम

वन्हिमान्धूमादित्यत्राव्याप्ति तथापि गुरुधर्मसाध्याभावमादाय तत्र नाव्याप्तिः संयोगेन द्रव्यस्याव्याप्यवृत्तित
यातादृशाभावस्यप्रतियोगिसामानाधिकरण्यसंभवात् शीघ्रोपस्थितिकसाध्यतावच्छेदकावच्छिन्नप्र
तियोगिताकसाध्याभावमादायाव्याप्तिप्रदर्शीपि तु मान्यत्वसाध्यकानुधावने साध्यव्यापकत्वचकपिसं
योगाभावसाधारणप्रतियोगिवैयधिकरण्यघटितमुपादेयमतो न वन्हेर्व्यापकत्वसंगतिरिति वह्नितां
मानमात्र्ये कचित्प्रतितमादायेति वरमक्रियात्मकोदासीनाभावमादायाव्याप्तिसंभवेपि तस्यापृथमो
दू०रा पस्थितस्यभावेनतत्तदनुसंधानत्वं लक्ष्यतावत्यानमादायाव्याप्तिप्रदर्शनस्यात्तु चितत्वमिति भावः साध्यता
वच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावस्यप्रतियोग्यधिकरणेकालिकसंबंधेन रजतत्वरूपप्रतियो
गिसामानाधिकरण्यसत्त्वादेव वह्निमान्धूमादित्यत्र तादृशाभावमादायाव्याप्तिविरहसंभवेन तदर्थं
तादृशसाध्याभावस्याव्याप्यवृत्तियोगमोनिरर्थकः न हुपरमेपि लाघवात्प्रतियोगिवैयधिकर
ण्याघटितव्यापकत्वस्यैवस्यापि तत्तया वन्ह्यभावस्यावह्नेर्न तं गतत्वन्नत्वं नास्यप्रतियोगिसा

भवारी
१२०
120

धानाधिकरणेयापपारनैवंयंचेत्यस्वरसत्त्वाकुरित्येनत्येनसूचितः संयोगानवन्यधिकरणस्यधर्मा
नधिकरणानत्परमाता येभिरनस्पनत्यरमाशैाकेनाधिसंवधेनवृत्तित्वानगीकारेनाहृशभेदाभा
वस्ययावदनगेतस्पनत्यरमारगरूपेहत्वधिकरणप्रतियोगिसामानाधिकरणाभावाप्रसवान्व
न्वेहरित्यादिगत्यादावत्तिव्यासेरभावाहस्त्वानितिमहाकालत्वादिहेतोर्विरुद्धनयासाध्यसामा
नाधिकरणयरूपविशेषणाहानेनाधितद्वारणासंभवाहित्यतऽक्तमन्यतरत्वेति आत्मकालान्यतर
त्वरूपविहेतवधिकरणत्वयावच्छेदेनस्वरवाघमावस्पनप्रतियोगिसामानाधिकरणमृतेमहेति ननुस
हातनत्वेप्रागभावाप्रतियोगित्वसतिध्वंसाप्रतियोगित्वरूपेनकालवृत्तित्वभेगभंमतः कारणोत्ततिं
कारणात्वस्यस्वरूपसंवधरूपत्वेनदृषिनत्तेघस्मातत्राह एवमपीति आत्मादीनांकालावृत्तित्वपि
स्यर्थः तेनेतिसाध्यानिष्टव्याप्यताया साध्यानावेछेदकसंवधावच्छिन्नत्वविवक्षणेनेत्यर्थः ध्वंसमा
नकालीनः वन्हेर्हेतुत्वेनहृधिकरणा[redacted]वच्छेदेनधमाभावस्पनसंवंधसामान्येन एम
१२१

२ स्वप्रयोजनमाह नवेति । २

३ न चावाकालिकसंबंधेन प्रतियोगिसामानाधिकरण्यमतउत्कंठमसमानकालीनेति । साध्यतावच्छेदका
वच्छिन्नेत्यनेन तथाविधव्यापकताघटकत्वेन संबंधानामनुप्रवेशे साध्यतावच्छेदकावच्छिन्नव्यापकताघटके
दकत्वमभावविशेषणांव्यर्थं स्यान्नहि तद्दत्तु यादृशे गोत्वाभावमादाय वह्निमान्धूमादित्यादावव्याप्तिः
संभवति तस्यापि पूर्वक्षणावच्छिन्नत्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यात् न च तस्याभा
द्वि वीयविशेषणतानासंबंधेन प्रतियोगिसामानाधिकरण्येपि तथात्वव्यापकताघटकसंबंधेन न प्रतियो
गिसामानाधिकरण्यमिति वाच्यं तत्राभावीयविशेषणताया अपि साध्यनिष्ठव्याप्यतानिरूपितगगना
भावनिष्ठव्यापकताघटकत्वात् न च साध्यनिष्ठव्याप्यतानिरूपितत्वप्रतियोगिनिष्ठव्यापकताघटकसं
बंधेन प्रतियोगिसामानाधिकरण्यमवश्यं विवक्षणीयं अन्यथा गोत्वाभावस्य यावद्दत्तगतस्य व
ह्निनिष्ठव्याप्यतानिरूपितद्रव्यत्वनिष्ठव्यापकताघटकयावद्दत्तगतसमवायेन प्रतियोगिसामाना
धिकरण्याभावादव्याप्तेरिति वाच्यं एवं सत्यावच्छिन्नत्वविशिष्टस्वाभावस्याप्यभावत्वादिना सा

त्वस्य गुरुतयेति। समवेतत्वायेत्यपा गुरुतया अर्थः पृथिवीसमवेतमिति धीविशेष्यत्वमतिप्रस

क्तमप्रमाविशेष्यत्वं तु गुरुभूतमेवेत्यतः पृथिव्यवच्छिन्नेति। स्वावच्छेदकसमानवृत्तिकेति स्वावच्छे

दकधर्मावच्छिन्नपर्याप्तिकत्वेनान्यतरत्वपर्याप्त्यधिकरणोऽभयत्वस्य पर्याप्तिसत्वे पि न दोषस्तना

दवस्थ्यं न च प्रतियोगितासमानवृत्तिकत्वमेव साध्यतावच्छेदके विशेषणमस्तु अन्यतरत्वावच्छि

न्नप्रतियोगितापर्याप्त्यवच्छेदकप्रत्येकधर्मावच्छिन्नपर्याप्तिकत्वस्याभावात् भावादिति वाच्यं तथा

सति द्रव्यत्वपृथिवीत्वोभयत्वावच्छिन्नप्रतियोगिताया अप्यव्यासव्याव[illegible]त्तिनयात स

मानवृत्तिकत्वस्याभावेन तादृशाद्वित्वावच्छिन्नाभावस्य लक्षणाघटकतया व्यधिकरणध र्म

तत्समानवृत्तिकत्वेच तत्पर्याप्ति

र्मावच्छिन्नाभावमादायातिव्याप्तिर्नावस्थापातात्तत्पर्याप्त्यासज्यवृत्तित्वाव्यासज्यवृत्तित्वान्यतररू
पेण साध्यतावच्छेदकसजातीयोभयमात्रवृत्त्यवच्छिन्नत्वस्य प्रतियोगिताविशेषणत्वोपगमेनैतादृशाति
व्याप्तिरतोऽपि वेतीति न समत नव्याविप्रलोघटत्वपृथिवीत्वद्वयत्वेनत्रितयवान्पृथिवीत्वादि
त्याद्यो घटत्वपृथिवीत्वान्यतरद्वयत्वोभयत्वावच्छिन्नाभावस्य व्यासज्यवृत्तित्वेनत्रित्वसजातीय
द्वित्वावच्छिन्नप्रतियोगिताकस्य कुत्रान्तर्गतत्वेन तदधिकरणजलादिवृत्तित्वाभावस्य पृथिवी
त्वे सत्वादिति व्याप्यापत्तेः केचित्तु साध्यतावच्छेदके प्रतियोगिताव्यापकत्वं साध्यतावच्छेदकताघ
टकसंबंधेनावश्यं वाच्यम् अतस्तत्र साध्यतावच्छेदकताघटकः पर्याप्तिरेवसंबंधस्तेन संबंधे
नद्वित्वस्य प्रतियोगिताधिकरणे प्रत्येकस्मिन्नभावसत्वान्नव्यापकत्वमतो नैयमतिव्याप्तिरतोऽपि
वेतीत्याहुः नच द्वित्वावच्छिन्नप्रतियोगिताया व्यासज्यवृत्तित्वे मानाभावेन द्रव्यत्वपृथिवीत्वोभ
यत्वसमनियतप्रतियोगित्वाप्रसिद्ध्या तदुभयसाध्यकपृथिवीत्वादिहेतावव्याप्त्यापत्तेः प्रतियोगिता १

मवा·टी·
१९१
191

व्यापकतायामभावप्रतियोग्यसमानाधिकरणत्वनिवेशस्यावश्यकत्वात् यादृशव्यापकपृथिवीत्वान्यतरत्वा
वच्छिन्नप्रतियोगिताविरूपितस्य पिताहृशव्यापकत्वस्य द्रव्यत्वपृथिव्युभयत्वेपि सत्त्वात् तथा
चोक्त विशिष्टाभावप्रतियोगितापाविशिष्टस्य पौसत्त्वे चेत्यर्थः अन्यथ पृथिव्यन्यत्वाविशि
ष्टद्रव्यत्वाभावस्यापि वि[redacted]वच्छिन्नसाध्यतावच्छेदकसमनियतप्रति
योगिताकत्वाभावेन व्यधिकरणधर्मावच्छिन्नाभावमादायोक्तस्थले तिव्याप्त्यापत्तेरिति भावः
विशिष्टभावप्रतियोगितायां विशिष्टपर्याप्तत्वमानाभावस्य स्वरस आहुरित्यनेन सूचितः सव्याप
कसाध्यतावच्छेदकेत्यादि सव्यापकसाध्यतावच्छेदकस्य व्यापकेन प्रतियोगितायस्येति समासा
श्रयणेन साध्यतावच्छेदकसमव्यापकधर्मावच्छिन्नप्रतियोगिताकत्वमर्थः समव्यापकशरीरे व्या
पकत्वव्याप्यत्वे च स्वावच्छिन्नसंबंधेन विवक्षिते तथा च प्रतियोगितावच्छेदकावच्छिन्नसाध्यतावच्छे
दकावच्छिन्नयोः सामानाधिकरणं फलितमित्यभिप्रायवतामतमाहाद्यपरे त्विति ननु तादृशसाध्यव्याप राम

कतावच्छेदकप्रतियोगिताकत्ववाभेवास्वतन्त्र्याहातएवेतियोगितायांतादृशानुपावच्छिन्नत्वनिवे
शादेवेत्यर्थः विशिष्टाभावनिरासस्तिपटत्वादिविशिष्टवाच्यत्वाद्यभावनिरासइत्यर्थः अन्यथा
घटत्वादिविशिष्टवाच्यत्वाद्यभावघटितकूटाधिकरणाप्रसिद्ध्याइदंवाच्यंतेयत्वादित्यादावव्या
प्तिःस्यादितिभावः अतएवेतिप्रतियोगितायांतादृशानुपावच्छिन्नत्वनिवेशादेवेत्यर्थः नदेयमि
ति घटत्वाभाववत्वस्यासंध्याव्यापकतावच्छेदकत्वाभावेननतदवच्छिन्नप्रमेयसामान्याभावस्यल
क्षणाघटकत्वेप्रमेयसाध्यकेसर्वोक्तासेरभावादिभावः अप्रसिद्धेरितीति वाच्यत्वेनघ
टत्वासत्ताभावस्यसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिकत्वाभावात्तादृशघटभेदस्यतथात्वे
पितत्प्रतियोगितावच्छेदकावच्छिन्नस्यवाच्यत्वस्यप्रतियोगितावच्छेदकतादात्म्यसंबंधेनप्रमेय
त्वावच्छिन्नप्रत्यव्यापकतापातस्यापिलक्षणाघटकत्वादितिभावः इदंचव्यधिकरणधर्मावच्छिन्न
प्रयोगिताघच्छेदकताकभेदानभ्युपगमेन अन्यथासमवायित्वेनप्रमेयपवत्भेदस्यप्रसिद्धिसंभवादिति

भवानी· घेयं अत्यन्ताभावेति व्याप्तेरभावादिति नच द्वित्वस्य कालिकव्याप्यवृत्तितया व्याप्यवृत्तिपदेनैव तद्वा
१९२ रणात् इति व्याप्तिः संभवत्येवेति वाच्यम् निरवच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वस्य तत्राभावेपि
प्राचीनमते ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वेन द्वित्वप्रागभावकाले तद्ध्वंसकाले वा द्वित्वाधि
192 करणे द्वित्वात्यन्ताभावस्यासत्वेन तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वरूपव्याप्यवृत्तित्वस्य
तत्र सत्वात् इत्यतिव्याप्तिवारणाय तद्व्याप्यवृत्तित्वशरीरे संताभावत्वस्य निवेशनीयत्वात् एत
द्रूपाभाववान् प्रमेयत्वादित्यादावतिव्याप्तिवारकतद्रूपात्मकाभावस्यासंग्रहापात्यन्ताभावत्वगर्भ
व्याप्यवृत्तित्वस्याव्यवच्छेदकत्वमत्वम्‌ समवेतत्वावच्छेदत्वादिति न च समवेतत्वस्य जलत्वादिवृत्ति
तया पृथिवीसमवेताभावप्रतियोगितावच्छेदकत्वं नित्यातिप्रसक्तस्याकथमवच्छेदकत्वमिति
वाच्यम् जलत्वादिसाधारणसमवेतत्वावच्छिन्नप्रतियोगिताया एव पृथिवीसमवेताभावनिरूपि
तत्वांगीकारेणातिरिक्तनिरूपितप्रतियोगित्वाप्रसिद्धेः नच पृथिवीसमवेतत्वावच्छिन्नाभावस राम

मवेतत्वावच्छिन्नाभावयोः समनैयत्याभावेन कथं तत्संयोगितायाः समवेतत्वमवच्छेदकमिति वाच्यम्
पृथिवीसमवेतत्वविशिष्टाभावस्य साध्यत्वेन स्वधायावपिसत्वेन यद्धेतुतात्तदुपलक्षितोवस्यैव साध्य भा
तयातस्य समवेतत्वावच्छिन्नाभावसमनैयत्याश्रितसत्तान्येति चेन्न सत्तान्यपृथिवीसमवेतत्वाव
च्छिन्नाभावसमवेतत्वावच्छिन्नाभावयोर्न समनैयत्यं गुणादौ व्यभिचारात् ततः समवेतत्वलघुत्वापेनैत
द्भावघटितयोगितावच्छेदकमिति भावः यत्रापि पृथिवीपरमनन्तस्य पृथिवीपरमिति नचैवं सत्तान्यैत
तस्य पृथिवीसमवेतत्वावच्छिन्नाभावस्याप्रसिद्धत्वात् कथं साध्यतात्पर्यवेन सत्तान्यपृथिवीसमवे
तत्वस्यैव घटितयोगितावच्छेदकत्वादिति वाच्यम् सत्तान्यैतत्पृथिवीसमवेतभिन्नधीविशेषत्वाद्यव
६ च्छिन्नाभावस्य साध्यत्वेनात्यथा न वायोरपि तादृशकृदाधिकरणत्वेनेति अन्यथा प्राचीननवीनम
तसाध्याधारेणापन्नेन इतिव्याप्तेरभिहितन न यत्प्राचीनमते हि त्वस्य व्याप्यत्वनियामक घटनकृदाधिकरणेण वा
योहेतोरन्तित्वेनमतद्धपसाधारणानित व्याप्तेरसंगत्यापन्नेरिति भावः नच नवीनमताभिप्राये यत्रोव

भवा टी तरतिव्याप्त्यभिधानमितिवाच्यमुत्तमनेतद्रूपस्या व्याप्यवृत्तितयाव्याप्यवृत्तिपरेनतद्वारणेनि
१९३ यमनेतद्रूपाद्धिघटितत्वेनेतिदीधितिग्रंथासंगत्यापत्तेरितिवस्तुतोयावतामेकाधिकरणपना
वतांसमुदायविवक्षितेपीत्यपि कारणान्तरमाः विवक्षणेपितत्राविद्यामेदीधितौ स्वविनाश्यादपि
193 वीपरस्यैतत्पृथिवीपरत्वंवीनाः संगतेरित्युभयत्र पृथिवीपदस्यैतत्पृथिवीपरत्वमावश्यकमि
तिध्येयं विशिष्टस्यानतिरिक्तत्वेनेति नाहशाश्रतियोगिताप्याः सजातस्यमतिनियतत्वाभावादि
त्यनेनान्वयितेविशिष्टस्यानतिरिक्तत्वेतादृशगुणान्यतेत्यादि अत्र केचित् विशिष्टस्यातिरिक्तत्व
माश्रित्यतादृशाव्याप्तिवारणमयुक्तमनतिरिक्तत्वांगीकारेणतादृशाव्याप्तिवारणोपि नस्तजा
तं मा ... तीयापाः समवेतत्वाज्जातिरित्यादौद्रव्यत्वेनद्रव्यसमवेताभयाभावगुणत्वेनतदन्यसमवेताभया
भावकर्मत्वेनतदन्यसमवेताभयाभावादीनामसेकसाधनसमानाधिकरणानामसाध्यतावच्छेदकस
मनियतप्रतियोगिताकानांकूटाधिकरणसामान्याद्यवच्छेदकसंबंधेनवह्निमत्वाश्रयसिद्धिरिति राम

धनाधात्व्याप्तेरवारणात् एवं गुरुधर्मस्य प्रतियोगितानवच्छेदकतया लाघवेन गुरुणान्यत्ववि
शिष्टत्वस्यैवावच्छेदकत्वमङ्गीकृत्य तादृशाभावप्रतियोगिताया: साध्यतावच्छेदकसमव्याप
कत्वाभावोपपादनमपि न युक्तं तथा सति गुरुणाकमान्यत्वविशिष्टसत्तावान् ज्ञानत्वादित्यादावपि
गुरुणाकमान्यत्वविशिष्टत्वस्यैव स्वसाध्याभावप्रतियोगितावच्छेदकतया तादृशाभावस्य सा
ध्यतावच्छेदकसमव्यापकप्रतियोगिताकत्वाभावेन व्यधिकरणधर्मावच्छिन्नाभावमादायाव्या
ति व्याप्तिप्रसङ्गात् विशिष्टस्यानतिरिक्ततया तेन गुरुणाकमान्यत्वसत्तयो: सामानाधि
करण्यस्यैवावच्छेदकतासंबन्धेन साध्यत्वस्य सार्वभौमसम्मतत्वेन तत्रातिव्याप्तिवारणेऽपि
समवेतवान् ज्ञानत्वादित्यादावव्याप्तिस्तत्र न द्रव्यान्यत्वविशिष्टसमवेतत्वाभावेन द्रव्यान्यत्वविशि
ष्टसमवेतत्वाभावादीनां प्रत्येकं साधनसमानाधिकरणानां साध्यतावच्छेदकसमव्यापकप्रति
योगिताकानां धिकरणे सामान्याद्यादि हेतुतावच्छेदकसंबन्धेन वृत्तेरप्रसिद्धेरित्याहु: तदसत् सा

कूटा

भवारी वैभौममतेऽभयपदस्यैकविशिष्टापरत्वरूपत्वेन विशिष्टस्य चातिरिक्तत्वेनोक्तोभयाभावानां साध्यता
१९४ वच्छेदकसम्बन्धप्रतियोगिताकत्वाभावात् पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद्व्यत्वाद्दिसाध्यवति
194 व्यभिचारवारणाय साध्यतावच्छेदकविशिष्टसाध्यद्वृत्तित्वसाध्यतावच्छेदकव्यापकीभूतस्वसमा
नाधिकरण्यधर्मावच्छिन्नप्रतियोगिताकत्वोभयाभावरूपप्रतियोगिव्यधिकरणनाभावविं
का शेषणेनानुपदंग्रंथकृतावस्य मार्गेणोक्तोभयाभावानामुक्तविशिष्टभागेनावारणाद्व्यसमवेन वे
मेये वान् जातेरित्याहाव्याप्तेरभावात् नचतादृशप्रतियोग्यधिकरणेन वृत्त्युरगात्वविशिष्टस म
त्ताभावादीनामपि वारणात्समवायेन जातेरित्याहाव्याप्तेरभावेन व्यर्थीभूतद्वारणायतादृ
शाभावानां साध्यतावच्छेदकसमव्यापकप्रतियोगिताकत्वाभावोपपादनेनाव्याप्तिवारणा
मिति वाच्यम् समाधानस्य सामानाधिकरण्यकत्वात्प्रतियोगिव्यधिकरणपस्यावे स
मारात नयाप्रागनुपास्थितेन साध्यतावच्छेदकसमव्यापकत्वरूपदीधितिस्फुटोक्तविशेष एप

गत

रोन भागु पस्थितेनन तद्वारतास्य पुक्तत्वाद्य धीधितौ सा शब्दस्य तादृशावच्छिन्नाप्रसिद्धेरिति न चैतेन पक्षव्याप्तिः इत्य
वच्छिन्नाभावस्य यावदन्तर्गतस्य [illegible] ताहशाभावाभावात् । न च इत्यवच्छिन्नाभाव [illegible] स्य साध्याभावाधिकरणवृत्तित्वस्य
व्याप्यप्रतियोगिताकत्वाभावात् न च प्रमेयत्वगगनत्वमिति गगनम् साधनसमानाधिकरणत्वेन साध्याभाव
विशेषणेसाध्याभावाधिकरणवृत्तित्व [illegible] व्याप्यत्वस्य न प्रतियोगितायां निष्प्रयोजनकत्वात् यासु
पासगात् आलोकाद्यभावस्य हेतुसमानाधिकरणसाध्याभावाधिकरणवृत्तित्वव्याप
प्रतियोगिताकत्वाभावेन यावदन्तर्गततया [illegible] माद्यपवह्निमान्धूमादिस्तादृशाव्याप्तेरभावात्
न च तादृशसाध्याभावाधिकरणवृत्तित्वालोकान्यत्वोभयाभावस्य धूमेऽभावादित्यस्यैव वारणाय
चरमाभावप्रतियोगितायां साध्याभावाधिकरणवृत्तित्वव्यापकत्वमावश्यकमिति वाच्यम्
तद्दानेपि पर्वतसंयुक्तत्व पर्वतेतरसंयुक्तत्वोभयाभावस्य निरूप्यातिरिक्तत्वावच्छिन्नस्यावश्यकत्वे
याव्याप्यन्यवच्छिन्नधर्मानवच्छिन्नत्वेन चरमाभावप्रतियोगितायाविशेषणोपत्वाद्[illegible]तादृशोभया

तेऽ३रूपक्षालिनः पर्वतांगं पुक्तेपुप्रसिद्धम् धूमा [illegible] वभावादव्याप्तेर्वारणायोभयपक्षविशिष्ट [illegible] ०२

भावा टी.
१९५ले
195

भाववारणात् नच मनस्त्वमूर्त्तत्वोभयाभाववान् स्पर्शवदन्यत्वादित्यादौ द्रव्यवृत्तित्वाभावस्य साधनस
मानाधिकरणसाध्याभावकूटाधिकरणावृत्तित्वं व्यापकप्रतियोगिताकस्यैतादृशाभावाद्व्याप्तेर्वारणाय प्र
तियोगितायां तादृशकूटाधिकरणावृत्तित्वव्याप्यत्वमावश्यकमिति वाच्यं द्रव्यान्यत्वविशिष्टसत्ता
भाववान् द्रव्यत्वादित्यत्र मनस्त्वमूर्त्तत्वोभयाभाववान्मनस्त्वादित्यादौ च साध्याभावस्य तादृशविशिष्टसत्ता
याः सत्तात्वेन मनस्त्वमूर्त्तत्वोभयाभावाभावस्य मूर्त्तत्वस्य मनस्त्वेन साधनाधिकरणावृत्तितया तत्
दतिनकूटाधिकरणे द्रव्ये मनसि च हेतोर्वृत्तितयाऽव्याप्त्यापत्त्या निरुक्तसाध्याभावत्वेन साधनाधि
करणावृत्तित्वस्यावश्यं निवेशनीयतया तेनोक्ताव्याप्तेरपि वारणात् स्पर्शवदन्यत्वाधिकरणेऽस्या ६
करणे मनसि वा मनस्त्वमूर्त्तत्वोभयत्वेनावृत्तेरिति चेन्न साध्यतावच्छेदकसमनियतप्रतियोगिताकत्व
पर्याप्त्यधिकरणे हेत्वधिकरणावृत्तित्वस्य विवक्षिततया द्रव्यान्यत्वविशिष्टसत्ताभाववान् द्रव्यत्वा
दित्यादौ मनस्त्वमूर्त्तत्वोभयाभाववान्मनस्त्वादित्यादौ चाव्याप्तेरभावात् सार्वभौममते विशेषस्यागति राम

रिक्तनयानादृशप्रतियोगिताकत्वपर्याप्त्यधिकरणस्य विशिष्टस्य सत्त्वे त्वेरूपेण साधनाधिकरणवृत्त्येऽवत्वेनः मू
म्नतत्त्वमन्तेतोभयाभावाभावत्वपर्याप्त्यधिकरणस्य तादृशोभयस्य मन्त्स्यवत्त्वेऽप्य पूर्वोक्तासिद्धिविरहेण सा
ध्याभाववत्त्वेन हेत्वधिकरणवृत्तित्वस्याविवक्षणात् एतस्य शून्याधिकरणतादृशप्रतियोगिताकत्वप
र्याप्त्यधिकरणस्योभयस्योभयत्वेनावच्छिन्नावपि प्रत्येकरूपेणावच्छिन्नतयाप्रसक्तत्वमन्तेतोभयाभाववान्स्य
र्शवत्त्वान्यत्वादित्यादौ पूर्वोक्तरीत्याऽव्याप्तिवारणाय च चरमाभावप्रतियोगितायां तादृशकूटाधिकरणव ता
त्तित्वव्याप्यत्वविवक्षणस्यावश्यकत्वात् न चैवं हि विवक्षणेन तादृशपर्याप्त्यधिकरणस्य हेत्वधिकरण
वृत्तित्वस्य व्याप्यत्वविवक्षणस्यावश्यकत्वात् विवक्षणे च गौरवाद्व्यापकत्वेन तादृशसाध्याभावत्वरूपेण
वृत्तित्वविवक्षणमेवोचितमिति वाच्यं तत्तल्लक्षणान्तरत्वात् तादृशविवक्षणोद्देश्यं तेयत्वाहित्यादा
वव्याप्तेस्तन्त्रघटत्वावच्छिन्नव्याप्तत्वसमनियतप्रतियोगिताकाभावत्वस्याभावत्वेऽपि स्वयोग्यत्वेन तेनरू
पराज्ञेयत्वाधिकरणवृत्तित्वस्याक्तसाध्याभावेऽभावात् न च घटत्वाभावभिन्ने घटत्वादित्यादौ घट

गदा· १२६
196

त्वाभावभेदाभावत्वेयोस्याधिकरणा स्य घटत्वाभावस्य साधनाधिकरणे घटादौ घट
त्वाभावत्वेन वृत्तित्वान्न हृदिनकूलाधिकरणघटादौ हेतोर्व्याप्तेः व्याप्तेरनिवाह अभावाधिकरणका
भावस्य व्यतिरिक्तत्वांगीकारात् घटत्वपटत्वाभावयोः कूटस्याधिकरणाप्रसिध्द्याः व्याप्तिवारणाय यना
दृशसाध्याभावत्वे नैयत्नु घटत्वपटत्वोभयत्वान्नु घटपटान्यतरत्वादित्यादौ प्रत्येकस्य साधनसमाना
धिकरणयोः हेत्वधिकरणवृत्तित्वविवक्षणं विशिष्टस्यातिरिक्तत्वांगीकारेप्यावश्यकमिति ननु घ
टत्वपटत्वोभयाभावस्य केवलान्वयितापातरभावानंगीकरणादिति यंच्च वह्व्यवृत्तित्वाभावस्य साध्या
भावकूटाधिकरणवृत्तित्वत्वव्याप्यप्रतियोगिकत्वाभावेन नमानाद्यतन्यायानेकाद्योगित्वादिरीत्युक्तातिव्याप्ते
र्वारणमशक्यमेव नियमघटितरीत्या एतत्पृथिव्यन्यायुवृत्तिद्वित्वेतत्पृथिवीजन्यगगयवृत्तिद्वित्वयोः
प्रत्येकं साधनसमानाधिकरणतया तद्वृत्तिनकूटाधिकरणे पृथिवीवृत्तित्वाभावस्य वायुत्वे सत्वादिदंपृ
थिवीत्वगुणावत्वमित्यादि पूर्वोक्ताहरणेष्वतिव्याप्तिरनुमुद्गिनानव्याप्तीह शतिव्याप्तेस्मरमाभाव राम

प्रतियोगिताघ्रंसाध्याभाववद्वृत्त्यधिकरणावृत्तित्वं व्याप्यत्वविशेषणाधीनतयानादृतविशेषणप्रयोजन
स्याभूतत्वमूर्तत्वोभयाभाववान् स्पर्शवदन्यत्वादित्यादौ संभवेनानत्याप्तिपरमर्थं नु उदाहरणस्योपस्थितत
यानैवंवताऽदृशान्यमूर्तत्वाभावसाध्यकेऽव्याप्तिरीधितिकृताभिहितेति ध्येयं यद्यपि च विशिष्टस्यानति
रिक्तत्वमतेऽन्यत्वविशिष्टसत्ताभाववान् द्रव्यभिन्नत्वादित्यादौ उक्तरीत्या व्यभिचारणाय साध्याभा
ववत्वेन हेत्वधिकरणावृत्तित्वविवक्षणमावश्यकं गुणकर्मस्यान्यत्वावच्छिन्नैकत्वोपगमाच्च न पूर्वोक्त
रीत्या केवलान्वयिन्यव्याप्तिः स्पर्शवद्भूतत्वमूर्तत्वोभयाभावसाध्यके स्पर्शवदन्यत्वादिहेतावुक्ताव्या
भा प्तिविरहाच्च रूपाभाव इति प्रतियोगितायां साध्यावृत्त्यधिकरणावृत्तित्वमाप्यत्वविशेषणस्याभवे शाद्र
व्यावृत्तित्वाभावमादाय मूर्तत्वमूर्तत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादौ नाव्याप्तिरिति विभाव्यते
नैतदैन स्वरसादेव किंचेत्यादिना दूषणान्तराभिधानं दीधितिकृतामिति ध्येयं ननु प्रतियोगितावत्वं प्रति
योगितानिरूपितानुयोगित्वेन वा साध्यानुयोगिभेदाभिन्नत्वात् आह साधनसमानाधिकरणेति नाप्यभा

धर्मावच्छिन्नाभावस्तोमस्य प्रतिं नित्साधनाधिकरणस्य वृत्तेरधिकरणे ५

भवानी वत्वादिनेत्यत्र स्वयंप्रदर्शितस्यमूतलधर्मत्वान्यतराभाववान् स्पर्शवदन्यत्वादित्यादावतिव्याप्तिवारकस्य
यादृशसाध्याभावस्तोमाधिकरणसाधनाधिकरणं तादृशस्तोमवद्वृत्तित्वाभावविवक्षणस्य परित्यागे
१६७ बीजं दर्शयति इत्थं चेति संगच्छत इति यादृशसाध्याभावस्तोमेत्यादिविवक्षणेनानुजलत्वस्य भावतेनो
157 वत्यभावघटितकूटस्य कुत्रचिदपि साधनाधिकरणावृत्तेः प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्व
विशेषणाप्रयोजनं यथा घटत्वादिघटितव्यधिकरणे वृत्तेः प्रतियोगितायां घटादौ हेतौ ईत्यादिव्या
प्तिसत्वेपि दीधित्युक्तकूटाधिकरणाप्रसिद्धिनिबन्धनाव्याप्तेरभावात् साध्यतावच्छेदकव्यापकत्वविशे
षणप्रयोजनं चासंगतं स्यादिति भावः यद्यप्यनुपदं वक्ष्यमाणा केचिदित्यादिमते स्थलान्तरे सा
ध्यतावच्छेदकव्याप्यत्वव्यापकत्वयोः प्रयोजनसत्वेपि दीधित्युक्तोदाहरणयोस्तत्प्रयोजनाभावादसं ता
गतिः स्यादिति भावः विशिष्टस्यानतिरिक्तत्वमत इति। नतिरिक्तत्वमतेनजलान्यत्वविशिष्टद्रव्यत्वा
घमावानां साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वाभावादेववारणादिति भावः तादृशाभावा राम १६७

न्येपि साध्यतावच्छेदकसमनियतप्रतियोगिता[redacted]काभावत्वेपसर्थः यद्धिजलान्य
त्वविशिष्टव्यत्वाप्रसयालाघवेनजलान्यत्ववैशिष्ट्यसमतप्रतियोगितावच्छेदकमितिनास्यसाध्यत
वच्छेदकसमनियतप्रतियोगिताकत्वं न च वेवं सत्यपि पृथिव्यन्यत्ववैशिष्ट्यस्येव नत्वात्तेन पृथिव्यन्यत्ववि
गौ शिष्टव्यत्वाभावोपि न तयोति व्यधिकरणधर्मावच्छिन्नाभावमादाय यातिव्याप्तिरेवेति वाच्यम् तत्र पृ
थिव्यन्यत्वव्यत्वयोः सामानाधिकरण्यस्यैवावच्छेदकतासंबंधेन साध्यत्वाविशिनभाव्येतेनसमवेत
वानुजातेरित्यारेतत्रूपान्यत्वविशिष्टसमवेतताभावेन रूपान्यत्वविशिष्टसमवेतनाभावमादायाव्याप्तिवा
रणायेति तत्प्रतियोगिवैय्यधिकरण्यं साध्याभावविशेषणमावश्यकमत्र तस्माद्दर्शितविशेषणादृ
तेपि पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद्द्रव्यत्वादित्यादौ घटान्यत्वविशिष्टद्रव्यत्वाभावपटान्यत्वविशिष्ट
द्रव्यत्वाभावादीनां निरुक्तप्रतियोगिवैय्यधिकरण्यविशिष्टानामधिकरणोह्येतोरप्रसत्याऽतिव्याप्ते
र्विशिष्टस्यापि निरुक्तत्वमालेयेवकारणीयन्तयो न एव समवेतत्वान्न जातेरित्यादावव्याप्तिवारणाय संनियोगि

मं॰टी
१९८
198

एवैयधिकरण्यमनुपादेयमेवेतिध्येयं आकाशात्मकसाध्यवत्वेपितन्निष्ठात्वसमानाधिकरणधर्मे
तासाध्यवत्तित्वोपादानेपितद्दोषतादवस्थ्यमतोव्यापकपर्यन्तानुधावनमितिभावः अव्याप्यवृत्तित्वानं
गीकारइति नइंगीकारस्तु महाकालान्यत्वसाध्यकेवक्ष्यमाणातिव्याप्त्यसंगतेरितिभावः हेत्वधिक
रणाननवच्छिन्नवृत्तिकइतिसंयोगात्मकाभावस्यानवच्छिन्नवृत्तिकत्वमात्रेणोववारणेपिसंयोगीय
शद्दिसाहौ संयोगाभावस्यहेत्वधिकरणेनिरुक्तप्रतियोगिवैयधिकरण्यविशिष्टस्यागुणादौ निरव
च्छिन्नवृत्तिकस्याप्रसिद्धतानिरूपकाधिकरणगुणादौ संयोगनवृत्तित्वाप्रसिद्धाः व्याप्तिर
ताहेत्वधिकरणाइति इत्थंचेति प्रतियोगिवैयधिकरण्यविशिष्टस्यहेत्वधिकरणावृत्तित्वविवक्ष
णाचेत्यर्थः साध्यवत्ताग्रहविरोधिनानिनियामकसंबंधेनसाध्याभाववत्वस्याविवक्षणेव्याप्यवृ
त्तितानिरूपकाधिकरणत्वविवक्षणामावश्यकमितिपूर्वोक्तंस्मारयन्व्याप्तेर्विशिष्टैकरूपत्वाय
माह तदयमितिआलोकाद्वृत्तित्वाद्यवच्छिन्नप्रतियोगिताया अभावादितिव्यधिकरणधर्मावच्छि राम

न्ताभावस्यैवसाधनसमानाधिकरणान्यान्तवृत्तिनकूटाधिकरणावृत्तित्वस्य जगृहवृत्तित्वएवसत्वेननना[illegible]तित्व
पकत्वस्य तादृशप्रतियोगितायामधभावादिति भावः ननुकथमेतत् एतद्वन्द्वेनभिन्नवन्त्युभयाभावत्व
वृत्तिभिन्नवन्तुभयाभावत्वानांप्रत्येकं साधनसमानाधिकरणानांकूटाधिकरणत्वस्यानिर्वाह्निमान्नानि
त्तुनयानवृत्तित्वत्वंघस्यालोकावृत्तित्वावच्छिन्नप्रतियोगितायाअभावएकत्वादिति चेत्र विशिष्टस्यान
तिरिक्तत्वमतेदर्शितरीत्यासाध्याभावेनिरुक्तप्रतियोगिवैयधिकरणस्यावश्यकतयोक्तोभयाभावा
नां लक्षणाघटत्वात्तत्रसाध्यवद्भिन्नत्वसाध्यतावच्छेदकत्व व्यापकत्वसमानाधिकरणात्तादृशोभया
त्वावच्छिन्नप्रतियोगिताकत्वाभयसत्वेनतदभावाभावात् ननुसाध्यतावच्छेदकवह्नित्वस्याधिकरणे
प्रत्येकस्मिन्नपर्याप्तिसंबंधेनद्वित्वस्यैववत्तत्संबंधावच्छिन्नद्वित्वाभावस्याप्रसक्तावकेथंतादृशद्वि
त्वस्य वह्नित्वव्यापकत्वमितिवाच्यम् जलान्यत्वविशिष्टद्रव्यत्वत्वादिरूपपार्थिवान्यत्वविशिष्टद्रव्य
त्वत्वाधिकरणेविशिष्टाभावसत्वादव्यापकत्वापत्त्याजलान्यत्वविशिष्टद्रव्यत्वाभावादीनामपिनि

भवा.
१९६
199

रु रुक्तप्रतियोगिवैयधिकरण्यविशेषणेनवारणासंभवात्साध्यतावच्छेदकव्यापकेत्यत्रव्यापकताघट
काभावेप्रतियोगितामात्राधिकरण्याभावविशेषणस्यावश्यकत्वात्तस्यापि नाहृशव्यापकत्वाद्धानेरि
ति नाहृशवृत्तित्वत्वव्यापकत्वे प्रतियोगितायांनेदयमि [redacted] त्यर्थः एतेनप्रति
योगितायांनाहृशवृत्तित्वत्वव्याप्यत्वस्यानिवेशान्नत्वसत्वान्यतरभाववान्नत्वाद्यव्यवृत्तित्वाभाव
रेगा स्याप्रियावृत्तगतेनेतायात्तस्यस्य शवहन्यत्वादिहेमावभावौतिव्याप्तिविरहात्तवेद्वारणायनत्तुपावृत्त
पत्वनत्कृत्याहिप्रयासो निष्फलः इत्ययास्तं तिशिष्टस्यातिरिक्तत्वपक्षेतत्त्वरमाभावप्रतियोगितायांता
हृशकूटाधिकरणावृत्तित्वत्वव्याप्यत्वविशेषणानवश्यकत्वस्यास्माभिरीधित्वात्व्याख्यानावसरेप्रदर्शि
तत्वयातन्मते मूर्तत्वमूर्तत्वाभाववान्स्पर्शवत्स्य [illegible] हन्यत्वादित्यादावतिव्याप्तिवारणायनन
त्वयासमताफत्याहितिदिक् अत्रप्रतियोगितागतपावत्वविशेषणाप्रयोजनेयथाश्रुतलक्षणघट
काभावगतयावत्वविशेषणप्रयोजनवदाध्यमित्यभिप्रायेणाहशेषमित्तिकेचित्तुस्वनिष्टत्वादि स्वनि राम

५ र्वसाधनसमानाधिकरणानांसाध्याभावानांकूटमित्यर्थः वह्नित्वावच्छिन्नवह्न्यभावप्रतियोगिस्याधि
करणेसाधनाकरणत्वाभावादिति द्रव्यस्याव्याप्यवृत्तित्वनयेनसत्तेचिद्वंसंयोगवीनवादित्याद्वैव्याववृत्तिर्वो
व्याववह्निमान्धूमादित्यादौनिर्वह्निनिष्ठयद्वह्नितद्धूमोभयाभाववह्निनदन्यधूमोभयाभावानांसाधनस
मानाधिकरणानांकूटनरधिकरणत्वस्यहेत्वधिकरणेऽभावान्नाहृशंसवह्निमदेवत्स्वव्याप्तिसं
योगेनद्रव्यस्याव्याप्यवृत्तित्वेनभवत्येवअत्रतःप्रतियोगितायांसाधनावच्छेदकव्याप्यत्वविशेषणा
व्याववृत्तिस्थलांतरेदृशेयत्तिमर्त्त्वेगगादित्यादाविति हेत्वधिकरणेऽसत्वादिति नचमर्त्त्वत्वएथिव्य
न्यत्वप्रोसमवायेनविशेषणतापावाभातस्यकेवलान्वयितयातद्वदितनाहृशकूटस्यहेत्वधिकरणे
नृ नत्वाद्वैसत्वात्कथमेतदितिवाच्यम् एथिव्यन्यत्वप्रहस्यएथिव्यांद्रव्यत्वप्रत्वात् नाहृशंचसत्वम्
र्तोदिकमेवेति आदिनाभूतस्यपरिग्रहः यदिवमनेननाहृशंत्वमनेनानि दृश्यधिकरणाधर्मावच्छि
न्नाभावात्मकनाहृशकूटस्याधिकरणसाधनाधिकरणगगनवृत्तिभूतत्वात्मकसाधनावच्छेद

कव्याप्यप्रतियोगिताकाभावघटितकूटस्य मनस्यभावात् एवं गगनमपि न तादृशं स्वं न तत्र तथ्याविषम्
र्त्तत्वघटितकूटस्याभावात् किंतु पृथिव्यादिचतुष्कमेव तादृशम् मूर्त्तत्वमूर्त्तत्वोभयघटितकूटस्य तत्र स
त्वात् न वृत्तित्वाभावस्य स्पर्शवदन्यत्वे सत्वात् स्वनाव्याप्तिः न च तादृशसाधनाधिकरणावृत्तिसाध्याभा
वकूटवत्त्वमित्यस्य साधनाधिकरणावृत्तितावच्छेदकसाध्याभावकूटत्वावच्छिन्नवत्त्वार्थकतयाऽमू
र्त्तत्वमूर्त्तत्वोभयघटितकूटत्वस्य साधनाधिकरणावृत्तितानवच्छेदकतया तथाविधकेवलमूर्त्तत्वादिघ
टितकूटत्वावच्छिन्नवत्त्वं मनस्यक्षतमेवेति वाच्यम् तथात्वेपि तादृशामूर्त्तत्वघटितकूटत्वावच्छिन्न
वत्त्वस्य मनस्यभावात् न हि तादृशसाधनाधिकरणायत्किंचिद्वृत्तितावच्छेदककूटत्वावच्छिन्नवत्त्व
लक्षणार्थः येन मनोगगनवत्त्वपर्हार्थः स्यात् तथा सति धूमवान्वह्नेरित्यादौ पर्वतादिनिष्ठव्यधि
करणधर्मावच्छिन्नसाध्याभावकू[illegible]धिकरणधर्मावच्छिन्नसाध्याभावकूटाधिकरणसाधना
करणसाधनाधिकरणमहानसवृत्तितावच्छेदकव्यधिकरणधर्मावच्छिन्नाभावमात्रघटितकूट टाम

त्तावच्छिन्नवत्तस्यपर्वतादवपिसत्त्वाज्ज्ञयनरववताहशस्वपदार्थत्वापत्त्याऽतिव्याप्तिः स्यादिति विच्यते तद्
अतिघटद्याद्येमूर्त्तत्वहेतुकेतत्रैववाऽव्याप्तिवारणार्थं साध्यतावच्छेदकव्यापकत्वंप्रतियोगितायांविशे
षणाभावरूपकमिति ध्येयं साधनसमानाधिकरणसाध्याभावस्येति साधनसमानाधिकरणसाध्या
भावकूटाधिकरणसाधनाधिकरणावृत्तिसाध्याभावस्येत्यर्थः । प्रथमदलप्रविष्टसाध्याभावविशे
वार षणत्वेवारणीयाव्याप्तेरसंगात् मूर्त्तत्वगंधवत्वोभयाभाववद्दिनां मूर्त्तत्वाभावाभावादीनांचनिरू या
कप्रतियोगिवैय्यधिकरण्याभावेन साध्यतावच्छेदकव्याप्यव्यापकत्वयोरुक्तव्यावर्त्तनेरसंगतेः प्रयोज
नाभावाच्चेति साध्यतावच्छेदकसंबंधेनयदभावप्रतियोग्याधेयतायामिति घटोयद पटान्यतरत्वादि
त्याहौ घटत्वाभवप्रतियोग्याधेयतायांकालिकसंबंधावच्छिन्नायामुभयसत्त्वान्नहसंग्रहापत्त्यातिव्या
प्तिः स्यादतः साध्यतावच्छेदकसंबंधेनेति धूमवान्वह्नेरित्यादौ धूमनिष्ठाधेयतायां धूमत्वावच्छिन्न
त्वमहानसानिउपिलत्वयोः सत्वादतिव्याप्तिवारणाययत्किंचिदिति व्यधिकरणधर्मावच्छिन्नाभा

मवारी. हा वं संयोगावच्छिन्नत्वात् ननु मात्रार्थघटकघटान्यासमवेतत्वमेव लाघवात् तादृशाभावप्रतियोगि
२०१ तावच्छेदकं तदवच्छिन्नप्रतियोगिताया च गगनादिसाधारणतया न समवेतत्वसमनियतत्वं [illegible] घटा
न्यासमवेतत्वस्यापि तादृशाभावत्वसमनियतत्वाभावात् लघुनोऽपि नावच्छेदकत्वमिति निवा[illegible]र प्रतियोगितावच्छेद
२०१ म कसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नयोस्तद्भावयोर्वा सैन्ये यत्र यत्र [illegible] नेतत्वादेतो यादृशाभावत्वे मात्रार्थघ
न प्रवेशस्तदवच्छिन्नाभावमादायाव्याप्तिमाह एवं वह्निमान् धूमादित्यत्रेति ननु व्याप्तिनद्वह्नित्वस्यैव ता
दृशाभावाभावप्रतियोगितावच्छेदकतया न तदवच्छिन्नप्रतियोगिताया न वह्नित्वव्यापकत्वमत आ
ह किंचेति ननु न वह्निविशेष्यकधीविशेष्यत्वेन स्वरूपसम्बन्धार्थो नानानुगमः किंतु तावदन्यतमत्वेनान्य
त तमत्वं च न तद्वत्तिशून्यत्वं ननु तज्जन्यान्यत्वमनेनाप्रसिद्धिरत आह प्रमेयं सत्वादित्यव्याप्तिरि
ति न न्यायमव्याप्तिस्तथापि समानासमानसमाधानाचेत्यत्र आह लघुत्वसहेरोरिति उभयत्वस्यै
कविशिष्टापरत्वरूपेण विशिष्टस्यातिरिक्तत्वेन तादृशाभावस्य साध्याभाववत्कूटाधिकरण राम

वह्नित्वव्यापकप्रतियोगिताकत्वाभावात् व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन प्रतियोगिताविशेष
णाद्यमनमनपतद्व्याप्तेर्वारणं नहि त्वया विशिष्टस्यातिरिक्तत्वमतावलंबनं कुशकंचन तथा स
ति मूर्तत्वगंधवत्त्वोभयाभाववादीनां साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वाभावेन तद्दुष्कापाः
प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणाव्यावृत्त्यसंगत्यापत्ते प्रतियोगितायां साध्या
भावकूटाधिकरणवह्नित्वव्यापकत्वाभावादेव समवायित्वघटितोक्तोभयाभाववारणेप्र
तियोगितायां तादृशकूटाधिकरणवह्नित्वव्यापकत्वविशेषणाव्यावृत्त्यसंगत्यापत्तेः स्वात एव व्या
सज्यवृत्तिधर्मानवच्छिन्नत्वस्य प्रतियोगितायां विशेषणेन तादृशाव्याप्तिवारणं प्रयुक्तमिति
दिक् अत्र घटद्वयाद्यपाद्वारासाध्याभावविशेषणं साधनसमानाधिकरणत्ववह्निमद्वृत्य
इत्यत्र वह्निमतो विशेषणेनान्तु साध्याभावस्येति वरनः कस्यचिन्मतमाह यतिति सतिष्ठेस्या
दिसमवेतवात्र द्रव्यत्वप्रकारकप्रमाविशेष्यत्वादित्यादौ सन्मात्रस्य स्वपद्यर्थेतेपि नद्वितीया

मवारी
२०२
202

भावस्य व्यधिकरणधर्मावच्छिन्नस्यैव साधनसमानाधिकरणावृत्तिमद्वृत्तितया तस्य हेतौ सत्त्वान्नाव्या
प्तिरेव वह्निमान् धूमादित्यादाविव पिनाव्याप्तिरिति भावः ननु साधनसमानाधिकरणत्वस्य वृत्तिमत्त्वावि
शेषणत्वे प्रतियोगितायां साध्यतावच्छेदकव्याप्यत्वविशेषणं व्यर्थं स्यात् मूर्त्तत्वं गगनादित्या
दौ मूर्त्तमात्रस्यैव तादृशपदार्थत्वेऽपि तद्वृत्तित्वाभावस्य व्यधिकरणधर्मावच्छिन्नस्यैव साधनस
मानाधिकरणावृत्तिमद्वृत्तितयाऽव्याप्त्यभावात् नतः स्थलान्तरे तथा व्यक्तिमाह द्रव्यत्वप्रकारके
ति समवायेन द्रव्यत्वस्य साध्यतायां स्वपदेन द्रव्यस्योपादानेन भवति द्रव्यनिष्ठस्य गुणादेर्वृ
त्ति द्रव्यत्वाभावोभयाभावस्य साध्यतावच्छेदकसमवायसंबंधावच्छिन्नप्रतियोगिताकस्य ता
दृशस्य कर्मावृत्ति द्रव्यत्वाभावोभयाभावस्य प्रत्यकूटं तदधिकरणं साधनाधिकरणमगुणा
दिनिष्ठगुणादिवृत्तित्वावच्छिन्नाभावादिघटितं न कूटस्य द्रव्येऽभावादतो द्रव्यत्वप्रकारकप्रमा
विषयत्वपर्यन्तानुधावनं परान्यत्वविशिष्टमूर्त्तत्वाभावेति नचेदृशाभावस्य साध्यतावच्छेदका राम
६

सपक्षत्वाश्रयमत्वेत्वाश्रयेयद्येन व्याविथम्मं नत्वाश्रयेयगगने वहेत्वधिकरणे तो वृत्तित्वस्य साध्यवत्त्वि धर्मावच्छिन्नप्रतियो
गिताकत्वस्य वसत्वेन नत्र भपक्षाश्रयान्यत्वस्य पक्षमाराप्रतियोगिवैयधिकरण्यं न संभवतीति वाच्यं तत्र सा
ध्यतावच्छेदकत्वाश्रयत्वस्य साध्यतावच्छेदकतावच्छेदकसंबंधेन विवक्षितत्वात्तथाविधयाति संबंधेनाभपक्षत्वा प
श्रयतद्व्यावृत्ताश्रयत्वस्यापरादावभावात् तादृशसंबंधप्रवेशप्रयोजनं तु तिरेहे पिप्रतियोगिताया ह्ली। विसु
क्तसाध्यतावच्छेदकव्यापकत्वविशेषणस्य सार्थक्यापेक्षत्वं त्रिवेशादृशं जाभावघटकतयाचावैयर्थ्याद्रि रं
ति ध्येयवेति वरमद्गुरुचरणास्वर्थः वह्निमा रणप्रतियोगिव्यधिकरणत्वाभावादेवेति यद्यपि साध्य
तावच्छेदकविशिष्टसाध्यवद्वृत्तित्वसाध्यवत्तिधर्मावच्छिन्नप्रतियोगिताकत्वोभयाभावरूपप्रतियो
गिवैयधिकरण्यं घटत्वायात्मकाभावेपि पटघवच्छेदेन वर्त्ततएव सामानाधिकरण्यस्य सार्वभो
मत्वेन व्याप्यवेत्तित्वात् तथापि तादृशप्रतियोगिवैयधिकरण्यविशिष्टस्यातादृशसाधनाधिकरणा
वृत्तित्वं न संभवतीति तद्विवक्षणाप्रयोजनस्यानुपपत्त्य अथवह्नेर्वक्तव्यत्वादिति साध्यतावच्छेदकसमनियत

२०३ 203 नप्रतियोगिताकत्वविशेषणतासाफल्यापत्ति अथ यागुणत्वं नि द्रव्यत्वाभावोभयाभाववत्कर्मत्वं नि द्रव्यत्वाभा
वयोरुक्तप्रतियोगिवैयधिकरण्याभावात्स्वपदेन द्रव्योपादानेन संभवति द्रव्यनिष्ठाधिकरणतावच्छि
न्नसाध्याभाववद्धिकरणसाधनाधिकरणवृत्तिगुणत्वस्य भावत्वघाविघकर्मावृत्त्यभावघटितद्र
व्यपदस्य वैयर्थ्यभावात् एवं च गुणकर्मणोरेव तादृशसत्त्वेनाहि इतित्वाभावस्य साधनसमानाधिकरणाव
न्निमति द्रव्यत्वेऽपि सिद्धस्य सत्तापाप्रभावादिति व्याप्यस्य भावेन तद्धारणाय योयान्नस्य प्रतियोगितायां साध्य
तावच्छेदकव्याप्यत्वस्यैव घटान्यत्वविशिष्टसत्त्वाभावादी नातिरुक्तप्रतियोऽवैयधिकरण्याभाव
नैवधारणात्तादृशाभावमादाय भूतत्वप्रमेयत्वोभयवान् भूतमूर्त्तान्यतरत्वादित्यादौ व्याप्तिवारणा
योयान्नस्य साध्यतावच्छेदकव्यापकत्वविशेषणस्य वैफल्यस्यादिति भावः हेत्वधिकरणावच्छेदेनेती
ति हेत्वधिकरणावच्छेदे [illegible] नसाध्यतावच्छेदकाप्रयधर्मोपयवत्तिलेनीस्य छि: अन्यथा साध्यतावच्छे
दकाप्रयेत्यादेः प्रयोजनेतराभावेन वैयर्थ्यापत्तेः न च परमवान्वहेरित्याद्यावतिप्रसंगवारकत्वमवावच्छि राम

२.३

न्नाभावादिसंग्रहफलकमाहुरित्याचष्टे प्रथमदलस्य विरहप्रतियोगिवैयधिकरण्येन तत्संग्रहाभावेऽपि
द्वितीयदलप्रविष्टप्रतियोगिवैयधिकरण्येन तत्संग्रहे तात्पर्यं संयोगाभावान्ते त्वत्र व्यधिकरणधर्मा
वच्छिन्नाभावसंग्रहाय साध्यवन्निष्ठभावच्छिन्नप्रतियोगिताकत्वोभयेति अतस्तां विशिनष्टीति अत्र
न्यघटपृथिवीत्वविशिष्टद्रव्यत्वाभावपृथिव्यन्यत्वविशिष्टद्रव्याभावयोरपि निरुक्तप्रतियोगिवै
यधिकरण्येन संग्रहः पृथिवीत्वविशिष्टद्रव्यत्ववद्व्यत्वादिसाध्यकवह्न्यादावव्याप्तिर्नास्त्यस्य मितिभा
वः सार्वभौममतेऽखण्डाभावस्याव्याप्यवृत्तितया पृथिवीत्वविशिष्टद्रव्यत्वाभावादेरपि गुणाद्यवच्छेद
नन्नादृशद्रव्यत्वघटितोभयाभावसत्त्वात् उक्तमुभयाश्रयान्यत्वमिति नञ्कृतापीति गुणादिति द्रव्य
त्वत्वावच्छिन्नाभावघटितनञर्थस्य साध्याधिकरणे वृत्त्या गुणादेरपि तादृशत्वाभावादिति भावः घटत्व
मनादृशेति घटान्यत्वविशिष्टद्रव्यत्वाभावादेः प्रतियोगिवैयधिकरण्याभावेन तादृशत्वादिति ना
दृशव्यधिकरणधर्मावच्छिन्नाभावकूटाधिकरणत्वस्य परोक्षेऽपि सत्त्वादिति भावः उभयाभाववत्त्वमिति

मवारी. संयोगित्वात्वादिसाध्यवत्तिव्याप्तिवारकस्य संयोगाभावस्य संग्रहाय स्यादुभयाभावयोगान्यत्वमत्र नोक्तमिति ध्येयं गुणा
२०४ दावेव तादृशप्रतियोगिवैयधिकरण्यवत्त्वेपीति सार्वभौममते सामामानाधिकरणपास्पाव्याप्यवृत्तित्वादिति भावः
२०५ नाव्याप्तिरिति इत्थं गुणादावित्यादौ न पूर्वोक्ताव्याप्तिरित्यर्थः तर्हि शकृताधिकरणवृत्तित्वव्यापकव्यासज्य
वृत्तिधर्मानवच्छिन्नेति व्यापिका व्यासज्यवृत्तिधर्मानवच्छिन्नेत्यर्थः वह्निमान्धूमादित्यादावव्याप्तेर्वा
रणाय व्यापकान्त एतन्मते वह्निमत्तः साध्याभावकृताधिकरणत्वेन तद्वृत्तित्वव्यापकत्वस्यालोकाव
पावृ त्यभावप्रतियोगितायामभावादेव तादृशाभाववारणात्प्रतियोगितायां तादृशवृत्तित्वव्याप्यत्वं न देयमिति
वोध्यं व्यासज्यवृत्तिधर्मानवच्छिन्नेत्यस्य प्रयोजनमाहेनेति प्रतियोगितायां तादृशवृत्तित्वव्याप्यत्वनिवेश
नेनापि वारणं न भवतीति सूचनाय समनियतेत्युक्तं ननु किंचेत्याद्यनिव्याप्तिवत्संयोगी सत्वादित्यादावव्या
प्तिव्याप्तिरेतन्मते दूषणान्तरमविष्पति एवं च प्रथमदलप्रविष्टप्रतियोगिवैयधिकरण्यशरीरप्रविष्टो
भयाभावयान्यत्वस्य नेउभयाभाववत्वोक्तावपि नक्षतिरित्यत आह किंचेति ननु अन्यतमत्वेनैव स्वपदार्थी राम

ध्यम

नामनुगमः अत्यन्तमवत्ववत्तमद्दव्यन्तिशब्दव्यत्वमत्तेनाप्रसिद्धेनाद्दिगिति हिग्गर्थस्तु हेत्वधिकरणावच्छेदेनत्यस्याखण्डा
भावघटक एव तया ऽवेयर्थ्यप्रमुखाद्य साध्यतावच्छेदक सम नियतत्वविशेषणार्थत्वे द्वितीयप्रतियोगिवैय
धिकरण्य शरीरे साध्यवत्तीतिस्थाने साध्यतावच्छेदकव्यापकेत्यस्य प्रवेशे पार्थक्येऽभावघटकत्वेनावैयर्थ्ये संभवाना ८
द्दग्धानि योगिवैयधिकरण्य स्यचाभाववत्त्व भेयत्वादित्यादौ घटत्वाघटत्व काभावसाधारणोपन्यस्त माह प्रतत्रावा
प्तिवारणाय द्वितीयदल प्रविष्टाभावप्रतियोगितापासाध्यतावच्छेदकव्यापकत्वविशेषणसाफल्य संभवे साध्य
तावच्छेदकव्यापकत्वेनोपादेयमित्यस्यासंगतिः किंचेदं वाच्यत्वे यत्वादित्यादावव्याप्तिः प्रथमदलेन वाच्यत्वाघभा
गं वस्यसंयोगेन वाच्य घभावाभिन्नतया साध्यवत्ति धर्मानवच्छिन्नप्रतियोगिताकत्वघटितः प्रतियोगिवैय
धिकरण्यसदभावादिति इदानीं घट इत्यादि चिन्तनेः स्वइकालविषयकत्वेनैवोपपत्तेः कालिकतया महाका
लस्य घटाद्यधिकरणत्वेमेनाभावात्स इहेतुरेवायमिति यत्तु ध्यानेन तदाहीधित्युक्तदूषणासंभवात्स्वपदूषणमाह इद
मतद्रूपाभिन्नमिति। इदानीमुक्तदूषणानामुद्धारप्रकारं दर्शयति हेतुतावभावस्याव्याप्यवृत्तितमेनविति

गदाटी

२०५

205

हेतुतावच्छेदकसंबंधेनहेत्वधिकरणावच्छेदेनेति इदंचतादृशवह्नित्वाभावसमुदायवत्त्वमित्यत्रान्वयीति हेत्वधिक
रणमहाकालानवच्छेद्यत्वादितिनचमहाकालानवच्छेद्यत्वेपिखंडकालस्यापिहेत्वधिकरणतयातदवच्छेद्यत्वाद्
तिव्याप्तिदुर्वारैवेतिवाच्यंहेत्वधिकरणावच्छेदेनेत्यस्ययावद्धेत्वधिकरणावच्छेदेनेत्यर्थकत्वात् नचसद्धेतौ
साध्याभावकूटाधिकरणवह्नित्वाभावस्यव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्यवह्निमद्वृत्तित्वान्न
स्वव्याप्यवह्नितयाहेत्वधिकरणावच्छिन्नत्वाभावादव्याप्तिरितिवाच्यम् प्रतीतिबलेनव्याप्यवह्नित्वावधिविल
न क्षणावच्छेदकत्वांगीकारात्यद्वातादृशहेत्वधिकरणावच्छिन्नत्वमवच्छिन्नत्वेनतादृशयावद्धेत्वधिकरणानवच्छि
न्नत्वाभयाभाववएवेतिनदोषः शेषंतादृशावच्छेदकत्वाभावयावत्त्वविशेषणादिकं घटत्वेननिर्धूमसंयुक्तत्वा
वच्छेदकत्वाभावस्यवह्न्यधिकरणावच्छेदेनसत्त्वादतिव्याप्तिवारणायावच्छेदकत्वाभावयावत्त्वविशेषणमित्या
दिरत्याबोध्यमित्यर्थः श्रीसरस्वत्यैनमः कूटघटितसमाप्तं ७ अननुगमत्वाभाववान्यस्यशेषरन्यत्वा
दित्याशेनतद्विपक्षारवह्नित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्यानातिव्याप्तियादृशसाध्याभावत्वमाधिक राम

रणं साधनाधिकरणमिति विवक्षायामपि मनोवृत्तित्वावच्छिन्नाभावघटितं नाह शङ्कृताधिकरणं मनोपीति तद्वृत्तीनत्र
नातिव्याप्तिरत आह महाकालान्यत्वादिसाध्यकइतियदि च महाकालस्य संबंधघटकत्वे यैव सिद्धेः कालिकतया
घटाद्यधिकरणत्वे मानाभावस्तदा हृदयमिति कृतेनापन्ने साध्याभावे हेतुसमानाधिकरणत्वस्य स्वयमेव विवक्ष
प णीयत्वात् यावद्विमान्यत्वे नवन्यत्वे संयोगादित्वादौ दीधितिस्तु कालिकव्याप्तिर्न संभवति तत्र संयोगेन वन्ह्यभावसम
वायेन वन्ह्यभावघटितनकृत्स्य हेत्वधिकरणेऽवृत्तेरतः स्थलान्तरे व्याप्तिमाह तेन समवायेन वन्ह्यभाववती
ति दृश्यं च साध्यतावच्छेदकसंबंधेनाभावविशेषणाय व्याप्यवृत्तित्वमिति अवच्छिन्नत्वनिकान्यत्वरूपव्याप्यवृ
त्तित्वानिवेशेनु संयोगे धूमाभावस्यातथात्वात् तथाविधव्यधिकरणधर्मावच्छिन्नाभावमादाय नातिव्याप्तिः स्या
धि दिति भावः व्याप्यवृत्तित्वविशिष्टसाध्याभावस्य साधानाधिकरणवृत्तित्वव्याप्यवृत्तित्वविशिष्टस्य भावाधिकरण
त्वमिति विवक्षायां स्वासाधारणप्रयोजनं न गुणवद्वृत्त्वादित्यादिना। दीधितौ वक्ष्यमाणव्याप्तिवारणरूपन
संभवत्येकविवक्षणेनैवनादृशाव्याप्तिवारणासंभवे तदन्यविवक्षणावैयर्थ्यापातादाह तः स्वयंतद्विवक्षयो

भवा॰
२०६
206

रसाधारणप्रयोजनमाहतेनसंयोगियत्नादित्यादिना स्वमते व्याप्यवृत्तित्वरूपाभावविशेषणस्य दैशिक
कालिकभेदेन दीधित्युक्तमुदाहरणद्वयं न घटते कालिकावच्छिन्नवृत्तिकस्य गुणसामान्याभावस्य गुणाद्यव
नवच्छिन्नवृत्तिकत्वेन स्वोक्तव्याप्यवृत्तित्वेन व्यावर्त्तनासंभवात् व्यावर्त्तनीयस्यैव तद्विधाभावादतो व्याप्यवृत्तित्वे
विशिष्टसाध्याभाववद्वृत्तित्वविवक्षणप्रयोजनं परं न पा गुणसामान्यस्येत्यादिदीधित्युदाहरणं योजयति वृत्तिव
विशिष्टसाध्याभाववद्वृत्तित्वविवक्षायाइति अव्याप्तिमसच्चेति नैवेतादृशविवक्षाविरहे कथमत्राव्याप्ति
प्रसक्तिः व्याप्यवृत्तित्वविशिष्टगुणसामान्याभावस्य द्रव्यत्वरूपसाधनसमानाधिकरणत्वाभावेन तस्य
कृत्स्नानंतर्गततया अधिकरणधर्मावच्छिन्नाभावमादाय लक्षणासंगतेरितिवाच्यम् व्याप्यवृत्तित्वविशिष्ट
साध्याभाववद्वृत्तित्वस्याविवक्षणे व्याप्यवृत्तित्वविशिष्टसाध्याभावस्य हेतुसमानाधिकरणत्वविवक्षणे
पो प्रयोजनाभावात् संयोगियत्नादिलादौ संयोगाभावस्यावच्छिन्नवृत्तिकत्वरूपव्याप्यवृत्तित्वविरहितऽधि त्वस
करणजन्यवृत्तित्वाभावस्य अधिकरणधर्मावच्छिन्नस्यैव वृत्तिमद्वृत्तितयाऽव्याप्तेरभावात् यद्वा स्वयमुक्ता

साधारण्यप्रयोजनस्य व्याप्यवृत्तित्वविशिष्टसाध्याभाववद्वृत्तित्वविवक्षणस्य फलमिदं न त्वसाधारण्यं फलमि
त्यत्रतात्पर्यं नैवं व्याप्यवृत्तित्वविशिष्टसाध्याभाववद्धेतुसमानाधिकरणत्वविवक्षणफलत्वस्यापि प्रकृते
९ संभवात्तत्कुतो नोक्तमिति वाच्यम् व्याप्यवृत्तित्वविशिष्टसाध्याभाववद्वृत्तित्वस्याहेतूपलक्षणेन यानस्यापिना
सर्वविषयत्वात् न च तथापि न व्याप्यवृत्तिरिति हीधियसंगतिः हेत्वधिकरणे व्याप्यवृत्तित्वविशिष्टसाध्या
भावाधिकरणत्वनिषेधस्यैव वक्तुमुचितत्वादिति वाच्यम् इत्यस्य ताधिकरणेत्यस्य न व्याप्यवृत्तिरित्यत्रापि न्वये
न तादृशानिषेधस्योपायेन तदग्रथेन लाभादिति अनवच्छिन्नवृत्तिकत्वरूपत्वे गुणसामान्याभावस्य तेन व्यावर्त्तना
त् द्वितीयोदाहरणासंगतेराह किंचिदवच्छिन्नवृत्तिकभिन्नत्वमिति संयोगेन साध्यतायां व्यभिचारिणि सा
ध्यतावच्छेदकसंबंधेनाभावस्य किंचिदवच्छिन्नवृत्तिका[redacted]भिन्नस्य व्यधिकरणधर्मावच्छिन्नस्यैव संभवा
दिति व्यासेनाह अभावः साध्यव्यापकतावच्छेदकसंबंधेनेति कालत्वप्रकारकप्रमाविषय इति अत्र साध्ये
हेतौ च कालत्वं महाकालत्वं च कालसाधारणमन्यतरत्वरूपं तेन भावत्वसत्त्वयोरभावस्य ध्वंसे [redacted]

भवारी
२०७
20)

~~चकालत्वमहाकालसंबंधकालत्वसाध्याधारतामन्यतरत्वरूपेणेनभावत्वसत्त्वयोरभावस्यचेः~~ अभावत्वाभावस्य
च महाकाले हेतुसामानाधिकरण्यबोध्य दैशिकेति स्वरूपसमवायाद्यात्मकदैशिकविशेषणतेत्यर्थः इत्थं
चेति व्यापकतासंबंधेनाभावविवक्षणे चेत्यर्थः साध्यतावच्छेदकसंबंधेनाभावविवक्षणे तु तन्तद्वयः पिंडाव
स्य नेः संयोगेनाभावे व्याधिकरणधर्मावच्छिन्नस्यैव प्राप्यवृत्तितयाऽतिव्याप्तिः स्यादेवं तन्नन्यत्वे तेजः
न्यू वह्नेः समवायेनाभावकूटाधिकरणत्वसामान्ये हेरेव प्रसिद्धतया न हि तत्वाभावस्य हेतोसत्ताद्युक्तस्थलेऽ
त तिव्याप्तिः स्यादितिभावः आहुरित्यनेनास्वरसो... विसमवायेतु नानासंबंधावच्छिन्नाभावनिवेशे गौरव
किंचास्मन्मते संयोगेन साध्यतायां साध्यतावच्छेदकसंबंधेन व्यापकत्वाप्रसिद्ध्या व्यापकतायां प्रतियो
गिवैयधिकरण्यनिवेशनस्यावश्यकतया साध्याभावे व्याप्यवृत्तिपदस्य सार्थक्यं तवतु लघुना सामा
ने नाधिकरण्येत्यनेनैव व्यधिकरणधर्मावच्छिन्नाभावमादाय व्यापकत्वाप्रसिद्धिवारणासंभवेन तद्वारणाय
व्यापकताघटकाभावे गुरुभूतप्रतियोगिवैयधिकरण्यनिवेश्य साध्याभावे व्याप्यवृत्तिपदस्य सार्थक्यं॥ राम

करणांशस्यालनादीतिव्यापमनुसरतीत्यादिकं स्मर्त्तव्यं विवक्षाद्वये साध्यतावच्छेदकसंबंधेनाभावे विवक्षयो
तु व्यापकताघटसंबंधेनाभावविवक्षयोश्च हेतावच्छेदकसंबंधेन वृत्तेरप्रसिद्धिरिति यत्र साधनसमानाधिकरण
णत्वविशेषणदाने व्यत्रहेतुतावच्छेदकसंबंधेन वृत्तित्वाप्रसिद्धिप्रयुक्ताव्याप्तिः किंतु तत्र द्विपत्तावृत्तित्वा
वच्छिन्नाभावकूटाधिकरणाप्रसिद्धिप्रयुक्तैवेति तन्न लक्षणे साध्यतावच्छेदकसंबंधेनैवाभावस्याग्रे यत्कू
तानिवेशितत्तपासमवायेन तत्तद्द्विपत्तावृत्त्यभावकूटाधिकरणत्वस्य सामान्याद्यावेवप्रसिद्धत्वात् अव्याप्ति
रित्यस्यापरिहृतरिति ह्रमापातत: तत्तद्द्विपत्तावृत्त्यभावस्याप्युक्तरूपाक्रांमतपातत्कूटाधिकरणस्याप्र
सिद्धत्वादेवातिव्याप्तेरभावात् परंतु पृथिवीत्वघटत्वप्रकारकप्रमाविशेष्यत्वादित्यादौ तत्तद्द्विपत्तावृत्तेः स
मवायेनाभावस्य जातित्वावच्छिन्नाभावस्य वा यत्कूटं तदधिकरणसामान्यादेरेव प्रसिद्धत्वया तदवृत्तित्वाभावस्य हे
तौ सत्त्वेनातिव्याप्तेरादिपदेन परिग्रहो बोध्यः व्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताक इति पर्व
मा नवृत्तित्वाभावे हायधर्मा हावव्यासेवारणाय व्यापकत्वांतःप्रतियोगिताघटविशेषणं व्यासज्यवृत्तिधर्मान

भवा॰टी

१०८ न

२०४

वच्छिन्नस्यस्यफलमाहतेनेति स्वरूपनवर्त्तीति मूलवृत्तित्वमत्र समानाधिकरणत्वगर्भमतोनव्याधिकरणधर्मा

वच्छिन्नप्रतियोगितासंग्रहः तादृशाकूटाधिकरणावृत्तित्वस्यगौरवेणानैकदेशत्वादिति तथाचतादृशाभावस्य

तादृशंवृत्तित्वत्वातिरिक्तवृत्तित्ववृत्तियन्निर्धर्मवृत्तित्वत्वतात्पर्यनवच्छिन्नप्रतियोगिताकत्वाभावेनयावद्धूमंतर्ग

ने नेत्वमिति भावः यद्यपिएवंसतिकूटाघटितलक्षणेपितत्साध्याभाववद्वृत्तित्वा[illegible]नवच्छिन्नप्रतियोगिताकत्वा

[redacted]तिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नत्वादित्यतीयविवक्षायाधूमवान्वह्नेरित्यादाव

त्व तिव्याप्तिः धूमव्यापकतावच्छेदकरूपावच्छिन्नाभाववद्वृत्तित्वस्यनिर्धर्मवृत्तित्वापेक्षयागौरवेणानवच्छेदक

त्वात्तस्याविषयकप्रतीतिविषयतात्वरूपंतद्वृत्तित्वंनिवेश्यतद्धारणानुसरणेपिसमानंतथापितत्र

हीधित्यनुरोधेनतथोक्तमत्रतुनरत्वरोधाभावात्स्वाविषयकेत्यादिविवक्षणेनिर्धर्मतेगौरवात्साध्याभाववद्वृत्ता

धिकरणावृत्तित्वस्यव्यापकव्यासज्यवृत्तिधर्मानवच्छिन्नत्वविशेषणमेवयुक्तमित्यभिप्रायान्न एवंपूर्वापरयुग्म राम

विरोधः यत्किंचित्सत्त्वाघ्नानधिकरणावृत्तित्वप्रतियोगिताकत्वमिति तथाचैतादृशाभावाप्रसिद्धे

वन्नात्ति व्याप्तिरिति भावः ननु ति वस्तुव्यापकसाध्याभावकूटाधिकरणावृत्तित्वं तत्त्वव्यापकघटितयो
गिताकत्वं च परमाभावीयघटां ननु नादृशवृत्तित्वत्वव्यापकव्यासज्यवृत्तिधर्मावच्छिन्नघटितयोगिताकत्व
मतो महाकालघटान्यतरवृत्तित्वाभावस्याप्रसिद्धत्वेपि नासंगतिः व्याप्यतावच्छेदकसंबंधेन कालस्य हेतुता
यासहृतौ हेतुतावच्छेदकसंबंधेन यत्किंचित्सहार्थानधिकरणत्वाप्रसिद्धेः घटसान्तत्वात् तुक्रमण मिति
यत्किंचित्त्वेनैव विद्यमानपदस्य लक्षणायैव निर्वाहे पदान्तरस्य वैयर्थ्यं चेत्तन्न ग्राहकमिति हृत्तात्पर्येनन
चेतिशब्दः प्रकल्पेऽक्षपदस्य स्यस्त्वादिनीयदृषयति नन्वेत्यादिना व्यधिकरणधर्मावच्छिन्नाभावस्यैव नादृ
शत्वेनेति ननु यावन्ति महाकालवृत्तित्वं नित्यनिरूपस्यान्यतमत्वरूपस्य एवं उभेरस्य कालिकसंबंधावच्छिन्नवृ
त्तित्वाप्रसिद्धया लाघवेनावच्छेदकत्वानवच्छिन्नाभावस्यापि साध्यवदन्यस्मिन् योगिकत्वाभावेन ता
दृशत्वस्य च हेतावभावान्न्यानि व्याप्तिरिति वाच्यम् तथापि नित्यता नान्यो घसद्दित्याहा वैयाप्ते त्वत्र ति
नित्यज्ञानविषयित्वसामान्याभावस्याप्रसिद्धत्वादुद्दत्वादिना नित्यज्ञानविषयित्वाभावस्य च हेतौ सत्वादिति

भवा०टी
२०९
209

आहुरित्यस्वरसस्तद्बीजं तु साध्यसमानाधिकरणस्वसमानाधिकरणसमुदायापकत्वस्यैव सम्यक्त्वे विशेषवैय
र्थ्यं यद्विशावनारकत्वार्थमभावघटनास्वसमानाधिकरणत्वव्यापकत्वास्वसमानाधिकरणाभावत्वव्यापक
त्वस्यासम्भवाच्च न वैयर्थ्यमित्युच्यते तथापि समानाधिकरणस्वसमानाधिकरणयावदभावककत्वस्यैव स
म्यक्त्वे विशेषवैयर्थ्यं दुर्वारमेव। यथासन्निवेशेऽसाध्यवैयर्थ्यमिति चेत्तथापि चरमाभावेऽभावत्वविशेषण
स्य तन्निमहृत्तित्वस्य च वैयर्थ्यं दुर्वारमेवेति श्रीमन्तः प्रतियोग्यवृत्तित्वेति अत्र मानाभावादिति हेतुर्वाध्यः
न तु समवायिना वाच्यत्वं नास्तीति प्रत्यक्षमेव समवायित्ववाच्यत्वनिष्ठप्रतियोगितावच्छेदकत्वे प्र
माणाभावविघातीत्यत आह न हीति ज्ञानस्येति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य त्वंयः
त एव वाच्यत्वं समवायीति ज्ञानस्य विशेषदर्शिनामभावेन कारणबाधात् समवायित्वप्रकारकत्वेन ना
स्तीति प्रत्ययेन संभवतीति भावः न च वाच्यत्वं समवायीति वाच्यत्वधर्मितावच्छेदककसमवायित्वज्ञानसं
भवेऽपि समवायित्वांशे निर्धर्मितावच्छेदककसमवायीति ज्ञानस्यासंभवात्कथं कारणबाधः प्रतियो गम

इं २

प्रतीत्यनुदयाद्

गितावच्छेदकप्रकारकज्ञानहेतुतायां धर्मितावच्छेदकस्याविशेषादिति वाच्यं नीलघटो नास्तीत्यादिसमा
नाधिकरणधर्मावच्छिन्नाभावप्रत्यक्षे यथा घटो नील इति सधर्मितावच्छेदकप्रतियोगितावच्छेदकप्रका
रकज्ञानस्यैव हेतुत्वमुपेयते नीलो घटश्चेति विशकलितज्ञानसत्त्वेनादृशप्रत्यक्षानुदयात् तथा सम
वायित्वपावाच्यत्वं नास्तीति प्रतियोगितांशे समवायित्वाद्यवच्छिन्नत्वावगाहिप्रतीतावपि वाच्यत्वसम
वायीति वाच्यत्वत्वधर्मितावच्छेदककसमवायित्वरूपप्रतियोगितावच्छेदकप्रकारकज्ञानस्यैव हेतुत्वमु
पेयते वाच्यत्वं समवायि चेति विशकलितज्ञानोत्तरं समवायित्वपावाच्यत्वं नास्तीति इति मिश्रदीत्याव्या
ख्यानस्यापि सायांबीजं दर्शयति ननु प्रतियोगितेत्यादिना नाभावप्रत्यक्षमात्रे नाभावलौकिकप्र
त्यक्षत्वावच्छिन्नेऽभावप्रत्यक्षविशेषे प्रतियोगितावच्छेदकविशिष्टप्रतियोगिमिश्रिताभावलौकि
कप्रत्यक्षे मानाभावादिति प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानशून्यकालविशेषणताना
वच्छेदकप्रकारकविशेषणाज्ञानरूपकारणविरहादेव विशिष्टवैशिष्ट्यावगाह्यभावप्रत्यक्षवारण

भवारी॰ संभवात्तस्तत्प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्य सत्वात्तत्रैरागात्तत्रहेतुत्वे मानाभावादिति भावः
अनुभवादिति नन्नु सामग्रीसत्वे विशेष्यविशेषवत्ताप्रितिरीत्या अभावलौकिकप्रत्यक्षस्य समवर्जनीयमेव स
२१० न्नवभवस्तु कस्यचित्प्रतिबंधकत्वमभ्युपेत्यापि समर्थयितुं शक्यत्वात् आह विशिष्टेति॥ मितिविशिष्टवै
शिष्ट्यविषयताशून्यस्य विशेष्यविशेषणतापित्तिरीत्याऽभावप्रत्यक्षस्यापादनेन न संभवतीति तस्याप्रसिद्ध
210 त्विनन्नसामग्र्याऽप्यकुसत्वात् विशेषणतावच्छेदकप्रकारकज्ञानशून्यकाले इंद्रियसंबद्धविशेष
णतावत्वात्। भावलौकिकप्रत्यक्षत्वावच्छिन्नापत्तिरेव फलतस्समापतितिरित्यपि न इंद्रियसंबद्धविशे
षणतायाः कार्यतावच्छेदके विशिष्टवैशिष्ट्यविषयताया अविश्नत्वेन नत्ववच्छिन्नजनकविशेषण
तावच्छेदकप्रकारकज्ञानरूपकारणाभावादिति सामग्र्यास्तदानीमभावेन नाइष्टापत्तेरप्यभावादिति भावः
अप्रसिद्धेवेति केचित्तु वाच्यत्वसमवायीति विशेषदर्शनदशायामपि समवायिनयावाच्यत्वेनास्तीतिव्य
धिकरणधर्मावच्छिन्नाभावप्रत्यक्षसंभवत्येवततस्तु वाच्यत्वसमवायीसाहार्यज्ञानस्यासंभवात् अत्रा राम
२१०

हार्थविशेषणतावच्छेदकप्रकारकत्वान्नस्य विशिष्टवैशिष्ट्यबोधहेतुत्वात्तु विशेषदर्शनोत्तरकालीना
यास्तथापि नयोगव्यक्तिर्नास्तीति प्रतीतेर्वीच्यत्वे समवायित्वाभावविषयकत्वमगत्या कल्पनीय
यमित्याहुः प्रतियोगिविशेषणस्यापि घटत्वादेः प्रतियोगितावच्छेदकत्वस्य घटनिष्ठविशेष्यता
निरूपितघटत्वनिष्ठप्रकारतानवच्छिन्नत्वस्वातंत्र्यमेवेति नस्वातंत्र्येणात्यसंगतेस्तादृशस्वातंत्र्यग्राहकवि
शेषणत्वरूपविषयतावच्छिन्नस्यापीति विशेषणत्वरूपविषयतावच्छेदेन प्रतियोगितावच्छेदक
त्वावगाहनात्स्वारस्यमिति भावः प्रतियोगिविशेषणतानवच्छेदेनेत्यर्थ इति प्रतियोगितावच्छेदकत्वादेः प्रतियोगि
विशेषणतानवच्छिन्नत्वस्यैव स्वातंत्र्यपदार्थत्वादिति भावः विशेष्यविशेषणाभिन्निरीत्या दंडीपुरुष इति ज्ञा
नेदंडत्वस्य पुरुषांशेऽप्रकारत्वाभावाद्दाहविशिष्टवैशिष्ट्यावगाहित्वादिति ननुदंडत्वविशिष्टदंडस्य पुरुषां
शेप्रकारत्वेन विशेषणताभिन्नदंडत्वस्यापि तद्दंडांशप्रकारत्वपरंतु दंडपारतंत्र्येणेति भावः साक्षात् स्वातंत्र्येणेय
दतीयद इति दंडत्वप्रतियोगित्वादेः सत्संबोधस्य प्रागुपस्थितस्याभिप्रायेणानद्धेतुपस्थितोक्तस्य संसर्गतयेव भा

नात्र घटस्याकारकप्रत्ययप्रसंगो बाध्यः यद्यपि प्रतियोगितामात्रसंसर्गेणावत्र घटत्वं प्रकारस्तत्रैव घटत्वी
यः स्याकारता एवं समवायसंबंधेन यत्र घटत्वं प्रकारस्तत्रैव घटस्याकारकत्वात्सतेनु स्वावच्छिन्नप्रतियो
गिताकत्वसंसर्गेण घटत्वस्याभावांशे प्रकारता न्यायं संगतस्तथापि घटो नास्तीत्यादौ घटत्वादेः स्वातंत्र्येणा
भावांशे प्रकारत्वस्यानानुभवः अन्यथा घटत्वेन घटो नास्तीत्याकारकतापत्तेरित्यत्र नामर्पं इत्युत्पत्त्यावच्छेदक
त्वेप्रतियोगिवैशिष्ट्याघटितमित्युक्तमिति एतच्च तत्तुमयत्रावगाह नेसजातीयमेव निविष्टं साजात्यंच
श्रि प्रमात्वमन्यत्वाभ्यां तेनतद्विषयीभूतावच्छेदकत्वे प्रतियोगितावच्छेदकविशेषिष्ट्याघटितत्वस्यतन्नियतत्वरूपस्यता
शी भ इतिभावः अमम [illegible] शें अमस्यर्थः पर्योटांशे घटत्वत्ववैशिष्ट्यस्याभावेन तन्नियतत्वस्य घटत्वेनादृशा
वच्छेदकत्वस्याप्यभावादिति भावः [redacted] घटत्वेन पटो नास्तीत्यनुभव
स्य दूरपहृवत्वादिति नीनिनचनारशानुभवस्वत्वेपि तस्य पटे घटत्वाभावावगाहित्वे वापपत्तो नव्याधिकरणा
धर्मावच्छिन्नाभावसाधकत्वमिति वाच्यम् इत्यनुभवस्य स्वस्य घटत्वे पटनिष्ठप्रतियोगितावच्छेदकत्वावगा हित्व
४ नीति घटत्वादेः पटादिनिष्ठप्रतियोगितावच्छेदकत्वा

भवाटी

२१२

212

ष्ठितपानुभवसिद्धस्येत्यनुभवस्येत्यर्थकत्वात्तत एवाह अत्र भाविकोऽनुभवसिद्धस्तत्रवदतीति एकत्वानुभव
सिद्धस्तस्य घटत्वे पटनिष्ठप्रतियोगितावच्छेदकत्वावगाहनयाऽनुभवसिद्धत्वमर्थोऽयः प्रतियोगिविशेषणतता वो
पन्नस्यैव प्रतियोगितावच्छेदकत्वमिति नियमेमानाभावः अभावांशे स्वानंतर्येण घटत्वस्य प्रतियोगितावं
छेदकत्वावगाहिनो घटत्वेन घटो नास्तीति प्रत्ययस्यानुभवसिद्धत्वादिति वहत्तांकल्पितपाठं दूषयति केचि
त्विति इत्यवेत्येवकारेण घटत्वेन पटो नास्तीति पाठव्यवच्छेदः एतद्विषयकत्वासंभवात् प्रत्ययस्य पटे घटत्वा
भावावगाहित्वेनाप्युपपत्तेर्व्यधिकरणधर्मावच्छिन्नाभावासाधकत्वेनाप्रकृतत्वादित्याशयः ननु तस्मानि
घटत्वेन घटो नास्तीति वद्धटत्वेन पटो नास्तीति प्रत्ययस्य घटत्वे स्वानंतर्येण प्रतियोगितावच्छेदकत्वावगाहिनो
दुर्वारतया व्यधिकरणधर्मावच्छिन्नाभावसिद्धेर्दुर्वारत्वादिति भावः नवैतन्मतेपि तत्प्रत्ययस्य पटे घटत्वाभा
वावगाहित्वशंकातेवकुंसमानाकारप्रत्ययानासमा~~नाकारविषयककत्वासंभवा~~न्विषयकत्वनियमेन यद
त्वेन घटो नास्तीति प्रत्ययसमानाकारस्य घटत्वेन घटो नास्तीति प्रत्ययस्य तादृशपटकत्वासंभवात् । रामः

२१२

212

श्री

१०० २

६२००